द्वचनंश्रुत्वातानिरक्षांसिभारत एवमस्त्वितितंप्राहुर्जगृहुःसमयंचतं ५ ॥ ॥

तत्प्रागवस्त्रियां २७ २८ अध्यायः ततःभग्नानिपार्श्वानिपशवोंगानिचहस्तपादादीनिपसमसतथा १ ५ ॥ ॥ ॥ ॥ ॥ रा.म० २७७

६ ७ ८ गत्वागतवान् अमेध्योपि दृष्टंन इति गमेः कनि धातुः ततो नुनासिकलोपे तु गागमे चैतद्रूपं आचचक्षे व्याख्यातः ९ १० १३ १४ १५ आज्ञा

ततः प्रभृति रक्षांसि तत्र सौम्यानि भारत नगरे मद्दृष्टं [स्१] जनैर्नगरवासिभिः ६ ततो भीमस्तमादाय गत्वा सं पुरुषादकं द्वारदेशे विनि
क्षिप्य जगामानुपलक्षितः ७ दृष्ट्वा भीमबलोद्धूतं बकं विनिहतं तदा ज्ञातयोस्य भयोद्विग्नाः प्रतिजग्मुस्ततस्ततः ८ ततः स भीमस्तं
हत्वा गत्वा ब्राह्मणावेश्म तत् आचचक्षे यथावृत्तं राज्ञः सर्वमशेषतः ९ ततो नरा विनिष्क्रान्ता नगरात्कल्यमेव तु ददृशुर्निहतं
भूमौ राक्षसं रुधिरोक्षितं १० तमद्रिकूटसदृशं विनिकीर्णं भयानकं दृष्ट्वा संहृष्टरोमाणो बभूवुस्तत्र नागराः ११ एक
चक्रां ततो गत्वा प्रवृत्तिं प्रददुः पुरे ततः सहस्रशो राजन्नरा नगरवासिनः १२ तत्राजग्मुर्बकं द्रष्टुं सस्त्रीवृद्धकुमारकाः ततस्ते
विस्मिताः सर्वे कर्म दृष्ट्वातिमानुषं दैवतान्यर्चयांचक्रुः सर्व एव विशांपते १३ ततः प्रगणयामासुः कस्य वारोद्य भोजने ज्ञा
त्वा चागम्य तं विप्रं पप्रच्छुः सर्व एव ते १४ एवं पृष्टः स बहुशो रक्षमाणश्च पाण्डवान् उवाच नागरान्सर्वानिदं विप्रर्षभ
स्तदा १५ आज्ञापितं मामशने रुदन्तं सह बन्धुभिः ददर्श ब्राह्मणः कश्चिन्मन्त्रसिद्धो महामनाः १६ परिपृच्छ्य स मां पूर्वं परि
क्लेशं पुरस्य च अब्रवीद्ब्राह्मणश्रेष्ठो विश्वास्य प्रहसन्निव १७ प्रापयिष्याम्यहं तस्मा अन्नमेतद्दुरात्मने मन्निमित्तं भयं चा
पि न कार्यमिति वाक्यमब्रवीत् १८

पितं राजकीयैः अशनिराक्षस [स्१] भोजनार्थं १६ १७ १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रा॰
१८०

१९ ब्रह्मन्महं ब्राह्मणोनाहं सोहं तत्र इति श्रुत्वा ब्राह्मणानां मुखात्पार्थमहं ऽहमेवं ब्राह्मणाः पूजनादिकं चक्रुः २० २१ इति बकवधः ॥ तेनपापु

सत्तरङ्गमुपादायपातो बकवनं प्रति तेन रङ्गं भवेदेतत्कर्मलोकहितंकृतं १९ ततस्ते ब्राह्मणाः सर्वेहृष्ट्वा निःयाश्रमविस्मिताः वै
श्याश्चशूद्राश्च मुदिता श्चक्रुर्ब्रह्ममहं तदा २० ततो जनपदाः सर्वे आजग्मुर्नगरं प्रति तदद्भुततमं दृष्ट्वा पार्थास्तत्रैव चावसन्
२१ इत्यादिपर्वणि बकवधः जनमेजयउ च ते तथा पुरुषव्याघ्रा निहत्य बकराक्षसं अतऊर्द्ध ततो ब्रह्मन्किमकुर्वत पांडवाः
१ वैशंपायनउ च तत्रैव न्यवसन्राजन्निहत्य बकराक्षसं अधीयानाः परंब्रह्म ब्राह्मणस्यनिवेशने २ ततः कतिपयाहस्य
ब्राह्मणः शंसितव्रतः प्रतिश्रयार्थितद्वेश्म ब्राह्मणस्याजगाम ह ३ स सम्यक्पूजयित्वा तं विप्रं विप्रर्षभस्तदा ददौ प्रतिश्रयं तं
स्मै सदा सर्वातिथिव्रतः ४ ततस्ते पांडवाः सर्वे सह कुंत्या नरर्षभाः उपासां चक्रिरे विप्रं कथयंतं कथाः शुभाः ५ कथ
यामास देशांश्च तीर्थानि सरितस्तथा राज्ञश्च विविधाश्चर्यान्देशांश्चैव पुराणि च ६ स तत्राकथयद्विप्रः कथांते जनमेजय पां
चाल्यस्याद्भुताकारं याज्ञसेन्याः स्वयंवरं ७ धृष्टद्युम्नस्य चोत्पत्तिमुत्पत्तिं च शिखंडिनः अयोनिजत्वं कृष्णायाद्रुपदस्य महामखे ८

रुषव्याघ्रा इति १ परंब्रह्म उपनिषदं परं श्रेष्ठं तं अधीयाना इति संबंधः २ शंसितव्रत इति तात्पर्यायो विप्रोसा प्रशंसा से ता१ जोपस्यसः प्रश
स्यव्रतः स्यर्थः प्रतिश्रयार्थी वासार्थी ३ अतिथिव्रतः अतिथिपूजनैकनिष्ठः ४ ५ ६ याज्ञसेन्याः द्रौपद्याः ७ ८ ॥ ॥ रा॰म॰
१८०

९ १० हे विप्र तौ द्रोणद्रुपदौ भिन्नौ वैरं प्राप्तौ ११ १२ अध्यायः गंगा १ ततो गंगां गतामिति पाठे तु गंगां गां ततः पूर्वं भरद्वाजागमनात्। पूर्वं अभि

तदद्भुततमं श्रुत्वा लोके तस्य महात्मनः विस्तरेणैव पप्रच्छुः कथां तां पुरुषर्षभाः ९ पांडवा ऊचुः कथं द्रुपदपुत्रस्य धृष्टद्युम्नस्य पाव
कात् वेदीमध्याच्च कृष्णायाः संभवः कथमद्भुतः १० कथं द्रोणान्महेष्वासात्सर्वास्त्राण्युपशिक्षत कथं विप्र सखायौ तौ भिन्नौ
कस्य कृतेन वा ११ वैशं एवं तैश्चोदितो राजन् स विप्रः पुरुषर्षभैः कथयामास तत्सर्वं द्रौपदीसंभवं तदा १२ इत्यादिपर्वणि
द्रौपदीसंभवे ब्राह्मणागमने च गंगाद्वारं प्रति महान्बभूवर्षिर्महातपाः भरद्वाजो महाप्राज्ञः सततं संशितव्रतः १ सोऽभिषे
क्तुं ततो गंगां पूर्वमेवागतां सतीं ददर्शाप्सरसं तत्र घृताचीमाप्लुतामृषिः २ तस्या वायुर्नदीतीरे वसनं व्यहरत्तदा अपकृ
ष्टाम्बरां दृष्ट्वा तामृषिश्चकमे तदा ३ तस्यां संसक्तमनसः कौमारब्रह्मचारिणः हृष्टस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ४
ततः समभवद्द्रोणः कुमारस्तस्य धीमतः अध्यगीष्ट स वेदांश्च वेदांगानि च सर्वशः ५ भारद्वाजस्य तु सखा पृषतो नाम पा
र्थिवः तस्यापि द्रुपदो नाम तदा समभवत्सुतः ६ स नित्यमाश्रमं गत्वा द्रोणेन सह पार्षतः चिक्रीडाध्ययनं चैव चकार क्षत्रि
यर्षभ ७ ततस्तु पृषतेऽतीते स राजा द्रुपदोऽभवत् द्रोणोऽपि राममश्रौषीद्दित्सन्तं वसु सर्वशः ८ ॥ ॥

षेक्तुं आगतामित्यर्थः २ व्यहरत् विशेषेणाहृतवान् चकमे कामितवान् ३ कुमाराणां सनत्कुमारादीनां समूहः कौमारं तत्तुल्यस्य ब्रह्मचारिणः
४ ५ ६ ७ ८ ॥

९ एकतमंएकतरं। अस्त्रसमुदायस्याविवक्षितत्वाद्दानमयं १० १२ समनुज्ञाप्यसमनुज्ञाप्य निशाम्य मररातीषरानिशामनेत्युक्तेति मित्वात् क्रः स्वःज्ञाप्येत्यपपाठः

वनंतुप्रस्थितंरामंभरद्वाजसुतोब्रवीत् आगतंवित्तकामंमांविद्धि द्रोणंद्विजोत्तमम् ९ राजउवाच शरीरमात्रमेवाद्यमयासमवशेषितं अस्त्राणिवा
शरीरंवाब्रह्मन्नेकतमंवृणु १० द्रोणउवाच अस्त्राणिचैवसर्वाणितेषांसंहारमेवच प्रयोगंचैवसर्वेषांदातुमर्हतिमेभवान् ११ ब्राह्मणउवाच
तथेत्युक्त्वाततस्तस्मैप्रददौभृगुनंदनः प्रतिगृह्यततोद्रोणःकृतकृत्योभवत्तदा १२ संप्रहृष्टमनाद्रोणोरामात्परमसंमतं ब्रह्मास्त्रंसमनुज्ञाप्यन
रेभ्योभ्यधिकोभवत् १३ ततोद्रुपदमासाद्यभारद्वाजःप्रतापवान् अब्रवीत्पुरुषव्याघ्रःसखायंविद्धिमामिति १४ द्रुपदउवाच नाश्रोत्रियःश्रोत्रियस्य
नारथीरथिनःसखा नाराजापार्थिवस्यापिसखिपूर्वंकिमिष्यते १५ ब्राह्मणउवाच सविनिश्चित्यमनसाप्रज्ञांचाल्पांप्रतिबुद्धिमान् जगामकुरुमुख्या
नांनगरंनागसाह्वयं १६ तस्मैपौत्रान्समादायवसूनिविविधानिच प्राप्तायप्रददौभीष्मःशिष्यान्द्रोणायधीमते १७ द्रोणःशिष्यांस्ततःसर्वा
निदंवचनमब्रवीत् समानीयतांश्छिष्यान्द्रुपदस्यासुखोपवै १८

टी० १३ १४ पूर्वंसखाइतिसखिपूर्वंबाल्येकृतंसख्यंकिंकथंइष्यतेप्राज्ञैर्नकथमपीत्यर्थः बाल्येहिमौग्ध्यात्तुल्यनाभिसख्यमिष्यतिनतुप्राज्ञइतिभावः १५
प्राप्येत्यपिपठन्ति १६ समादायहस्तेगृहीत्वाप्रददौ १७ १८ १८ ॥ ॥

१९ २० त्रवत्यांअहि[च्छ]त्रे २१ २३ राज्यार्धं त्वया सह संगम्येति शेषः भागीरथ्याहमिति तिष्ठेत्यध्याहार्यः २४ २६ उच्चावचनेनैव सख्यं कृत्वा न तु मनसा ब्रा

ह्माचार्यवेतनं किंचिद्धृदि परिवर्तते मम कृतास्त्रैस्तत्प्रदेयं स्यात्तद्वदंतं वदंतानघाः सोऽर्जुनप्रमुखैरुक्तस्तथास्त्विति गुरुस्तथा १९ यदा च पां
डवाः सर्वे कृतास्त्राः कृतनिश्चयाः ततो द्रोणोऽब्रवीद्भूयो वेतनार्थमिदं वचः २० पार्षतो द्रुपदो नाम छत्रवत्यां नरेश्वरः तस्मादाकृष्य तद्राज्यं
मम शीघ्रं प्रदीयतां २१ ततः पांडुसुताः पंच निर्जित्य द्रुपदं युधि द्रोणाय दर्शयामासुर्बद्ध्वा ससचिवं तदा २२ द्रोणाड च प्रार्थयामि त्वया
सख्यं पुनरेव नराधिप अराजा किल नो राज्ञः सखा भवितुमर्हति २३ अतः प्रयतितं राज्ये यज्ञसेन त्वया सह राजासि दक्षिणे कूले भागीर
थ्याहमुत्तरे २४ ब्राह्मणाड च एवमुक्तो हि पांचाल्यो भारद्वाजेन धीमता उवाचास्त्रविदां श्रेष्ठो द्रोणं ब्राह्मणसत्तमं २५ एवं भवतु भद्रं ते
भारद्वाज महामते सख्यं तदेव भवतु शश्वद्यदभिमन्यसे २६ एवमन्योन्यमुक्त्वा तौ कृत्वा सख्यमनुत्तमं जग्मतुर्द्रोणपांचाल्यौ यथा
गतमरिंदमौ २७ असत्कारः स तु महान्मुहूर्तमपि तस्य तु नापैति हृदयाद्राज्ञो दुर्मनाः स कृशोऽभवत् २८ इत्यादिपर्वणि द्रौपदीसं
भवे ब्राह्मणाड च अमर्षी द्रुपदो राजा कर्मसिद्धान्द्विजर्षभान् अन्विच्छन्परिचक्राम ब्राह्मणावसथान्बहून् १ पुत्रजन्म परीप्स
न्वै शोकोपहतचेतनः नास्ति श्रेष्ठमपत्यं मे इति नित्यमचिंतयत् २ ॥ ॥

ह्मणस्याद्रोहित्वेऽपि हृत्रियस्य द्रोहित्वात् २७ तदेवाह असत्कार इति २८ अध्याय १ २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्मा:
१८१ पुत्रार्थं धर्मं अधिगात्य ब्रवीहि इत्यन्वयः ३ ४ कल्माषीति कल्मषवर्णा यमुनाममितः गंगाकूले च परिभ्रमन् । कल्माषपादस्य कल्माषीम् अमितः समीपे इत्यर्थे ५ ६ पर
मे ब्रह्मणि वेदे वा ध्याने शीलं यस्य असौ । नारदो यो कुमारी प्रभायोधौः कणिवत्कावीनो । तरणिगात्सुमरोपु पुंसि कुमारीनो कपोः स्त्रियामिति मेदिनी । सूर्यभक्तौ वा ब्रा

पा ३

जातास्पुत्रान्संति वेदाद्धि वद नूनिमि चाब्रवीत् । निःश्वासमपरम् श्वासी दीर्घं प्रतिचिकीर्षया ३ प्रभावं विनयं शीलं ज्ञो ब्राह्मणस्य चरितानि च
कृत्रिमं वचलेनास्मि विनयन्नोध्याग्रकल ४ प्रतिकर्तुं नृपश्रेष्ठो यजमानोपि भारत । अमितः सोपकल्माषीं गंगाकूले परिभ्रमन् ५ ब्रा
ह्मणावसथं पुण्यमासमाद महीपतिः । तत्र नासान्तकः कश्चिन्मत्तो सीदव्रतो द्विजः ६ तथैव च महाभागः सोपक्ष्पलं ह्यसितव्रतो
याजोपयाजौ ब्रह्मर्षी शाम्यतोपरमेष्ठिनौ ७ संहिताध्यापने युक्तो गोत्रतश्चापि काश्यपौ । तारणेयो युक्तरूपौ ब्राह्मणावृषिसत्तमौ
८ स तावामंत्रयामास सर्वकामैरतन्द्रितः । बुध्वा बलं तपो ज्येष्ठं कनीयांसमुपह्वरे ९ प्रपेदे छंदयन्कामैरुपयाजं धृतव्रतं पाद
शुश्रूषणे युक्तः प्रियवाक्सर्वकामदः १० अर्चयित्वा यथान्यायमुपयाजमुवाच सः । येन मे कर्मणा ब्रह्मन्पुत्रः स्याद्द्रोणमृत्यवे
उपयाज कृते तस्मिन्गवां दातास्मि तेऽर्बुदं ११ यद्वाते न्यद्द्विजश्रेष्ठ मनसः सुप्रियं भवेत् । सर्वं तत्ते प्रदाताहं नहि मे नास्ति संशयः १२

ह्मणो ब्रह्मविदौ । ऋषिसत्तमौ मंत्रदृष्टेषु श्रेष्ठौ ८ उपह्वरे एकांते ९ उपदेशप्रदेशारं गतवान् १० तस्मिन्कार्ये कृते सति अर्बुदं दशकोटीः रामः
दातास्मि दास्यामि ११ १२ ॥ ॥ १८१

१३ १४ १५ असांप्रतं अयुक्तं। अनुव्रजन् पश्यं विमर्षं विचारं संकरादाने संकरो दोषसंपर्कः। तद्युक्तवस्त्वादाने १६ १७ उत्सृष्टं उच्छिष्टं १८ अघृणीत्व

नमः उपयाजो १

२२

इत्युक्तो नाहमित्येवं तमृषिः प्रत्यभाषत आराधयिष्यन्द्रुपदः स तं पर्यचरत्पुनः १३ ततः संवत्सरस्यान्ते द्रुपदं स द्विजोऽब्रवीत्काले राजन्मधुरया
गिरा १४ ज्येष्ठो भ्राता ममागृह्णाद्विचरन्निर्झरे वने अपरिज्ञातशौचायां भूमौ निपतितं फलं १५ तदपश्यमहं भ्रातुरसांप्रतमनुव्रजन्।
विमर्षं संकरादाने नायं कुर्यात्कदाचन १६ दृष्ट्वा फलस्य नापश्यद्दोषान्पापानुबंधकान्। विविनक्ति न शौचं यः सोऽन्यत्रापि कथं भवेत्
१७ संहिताध्ययनं कुर्वन्वसन्गुरुकुले च यः भैक्ष्यमुत्सृष्टमन्येषां भुङ्क्ते स्म च यदा तदा १८ कीर्तयन्गुणमन्नानामघृणी च पुनः पुनः। तं वै
वै फलार्थिनं मन्ये भ्रातरं तर्कचक्षुषा १९ तं वै गच्छस्व नृपते स त्वां संयाजयिष्यति जुगुप्समानो नृपतिर्मनसेदं विचिंतयन् २० उपया
जवचः श्रुत्वा याजस्याश्रममभ्यगात् अभिसंपूज्य पूजार्हमृषिं याजमुवाच ह २१ अयुतानि ददान्यष्टौ गवां याजय मां विभो द्रोणवै
राभिसंतप्तं प्रह्लादयितुमर्हसि २२ स हि ब्रह्मविदां श्रेष्ठो ब्रह्मास्त्रे चाप्यनुत्तमः तस्माद्द्रोणात्पराजेषं मां वै स सखिविग्रहे २३

जाहीनः १९ हे नृपते त्वं गच्छ हे स्वरे आत्मीयामनसा इदं याजचरितं जुगुप्समानो निंदन् विचिंतयन्स्वकार्यं चेति शेषः २० १ अष्टावयुतानि ददौ स्विकपाणि नि
पश्येप्तरानानं देवतागुरुमिति स्मृतेः पायनमात्रमेतत्तान दाहिर्गणः अबुद्ध्वा प्रतिज्ञानात् २२ पराजेषं पराजितवान् विपराभ्यां जेरिति तङ् २३ ॥ ॥

आ० तस्यात्तस्माद्दयतीश्रेष्ठं २४ २५ २६ ब्रह्मदण्डे इति सार्द्धश्लोकः चोप्यर्थे ब्रह्मतेजः सहितेन क्षात्रेण तेजसा द्रोणात्तेविदिताश्रेष्ठत्वापि केवलं ब्राह्मात्वदीयं विशि
१८३ ष्यते क्षात्राद्बलात् अहं तु हीनो ब्राह्मबलेन भीत इति पाठे ब्राह्मात्तबलाद्धीनः ब्राह्मं तेजः प्रपेदिवान् कृतप्रारंभान् हृतवान् येन पुत्रं लभे येन तत्कर्म कुरु ३० याज्यापीठ

क्षत्रियो नास्ति तुल्योस्य पृथिव्यां कश्चिदग्रणीः कौरवाचार्यमुख्यस्य भारद्वाजस्य धीमतः २४ द्रोणस्य श्र जालानि प्राणिदेहहराणि च षडर
थिधनुर्मात्रस्य दृश्यते परमं महत् २५ स हि ब्राह्मणवेषेण क्षात्रं वेगमसंशयं प्रतिहन्ति महेष्वासो भारद्वाजो महामनाः २६ क्षत्रोच्छेदायवि
हितो जामदग्न्य इवास्थितः तस्य ह्यस्त्रबलं घोरमप्रधृष्यं नरैर्भुवि २७ ब्राह्मं संधारयंस्तेजो हुतार्चिरिवानलः समेत्य स दहत्याजौ क्ष हुता ३
त्रधर्मपुरःसरः २८ ब्रह्मक्षत्रे च विहिते ब्राह्मं तेजो विशिष्यते सोहं क्षात्राद्बलाद्धीनो ब्राह्मं तेजः प्रपेदिवान् २९ द्रोणाद्विशिष्ट
मासाद्य भवन्तं ब्रह्मवित्तमं द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयं तत्कर्म कुरु मे याज्य वितराम्यर्बुदं गवां ३० तथेत्युक्त्वा तु तं याजो याज्या
र्थमुपकल्पयत् गुर्वर्थ इति चाकाममुपयाजमचोदयत् ३१ याजो द्रोणविनाशाय प्रतिजज्ञे तथा च सः ३२ ॥ ॥ ॥

पदस्येष्टसाधनं यागं उपकल्पयत् मनसा तत्प्रयोगं स्मृतवान् अस्तु भाव आर्षः गुर्वर्थः गुरुः आसावर्थश्चेति अर्थिमारोपयत् द्रोणहन्तुः पुत्रस्योत्पादनं इति
हेतोः उपयाजं अकामं अप्यचोदयत् उपकल्पने प्रेरितवान् आत्मसमर्थं चेतद् इति याजेन उपयाजमपि निश्चयार्थं संचोदितवान् ३२ ३१ ॥ ६५ एम०
१८३

वैतानं श्रौताग्निसाध्यं आचख्यौ आख्यातवान् ३३ सचेति उपयाज उवाच ३४ वैशंपायन उ च भारद्वाजस्येति आजह्रे कृतवान् कर्मसिद्धये. ३५ प्रैहि प्रकर्षे
ण आगच्छ मे हि आह्वयामि हविर्ग्रहीतुमिति शेषः पृषति पृषतस्नुषे इत्त एवमेवंधा तु पोगेऽीप॥ अस्पृतु पार्षतीति पावककल्पयंति ३६ अवलिप्तं हविषितं त्वात् दिनाघ्रश्रा
लितत्वादिति भावः अवलेपं तु गर्वे स्यात् लेपने दूषणेऽपि चेति मेदिनी।गंधान् अंगरागादिजान्॥ अस्नातास्मीति भावः याहतो धावतेत स्ये स्पावदन्न पास्या

ततस्तस्य नरेंद्रस्य उपयाजो महातपाः आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै ३३ स च पुत्रो महावीर्यो महातेजा महाबलः
इष्यते यद्विधो राजन् भविता ते तथाविधः ३४ भारद्वाजस्य हंतारं सोभिसंधाय भूपतिः आजह्रे तत्तथा सर्वं द्रुपदः सर्वसिद्धये
३५ याजस्तु हवनस्यांते देवीमाज्ञापयत्तदा प्रैहि मां राज्ञि पृषति मिथुनं त्वामुपस्थितं ३६ राज्ञी च अवलिप्तं मुखं
ब्रह्मन् दिव्यान् गंधान् बिभर्मि च सुतार्थेनोपलब्धास्मि तिष्ठ याज मम प्रिये ३७ याज उ च याजेन श्रपितं हव्यमुपयाजाभिमंत्रितं
कथं कामं न संदध्यात्सा त्वं विप्रैहि तिष्ठ वा ३८॥

भित्तस्यात्र प्रसुमारक इत्याद्युक्तनिबंधारत्रीव्रतं चरीदति विहितो अस्पृश्याधमाविति तदेवाह नोपलब्धास्मि उपलब्धुं स्पृष्टुं योग्यानास्मि तस्मान्मत्तवद्वा
ससानसंवर्द्धते तिष्ठ याम सह संवादस्यापि निषेधात्। अतो हे तो हे याज मम प्रिये इद बुसुतार्थे स्तत्र रूपेप्रयोजनेति ष्ठमु ठिकातं प्रतीतो हूहेव स्पर्ध्यः ३७
श्रपितं पक्वं हे स्त्रेरेत:सिंचव विना आवयोः साम्य प्यमिनिशुनमुत्पत्स्यतः त्स्यर्थ।विप्रेहि दूरं वा गच्छ तिष्ठ प्रपोषा विधिस्तु न विलंब सह तेन्स्पर्ध्यः ३८

आ० १८४ ३९ ४० ४१ नेयंसेहेनसोऽवंनी । अयोनिजस्य धृष्टद्युम्नस्य तेजसोद्भूः सहत्वादित्ति भाव: ४१ ४५ अमरवर्णिनी देवकुमारी दुष्टवधायोद्यता दुर्गेत्यर्थः ४६

ब्राह्मणाश्च एवमुक्त्वा तु याजेन हुते हविषि संस्कृते उत्तस्थौ पावकात्तस्मात्कुमारो देवसंनिभः ३९ ज्वालावर्णो घोररूपः किरीटि
वर्म चोत्तमं बिभ्रत्सखड्गः सशरो धनुष्मान्विनदन्मुहुः ४० सोध्यारोहद्रथवरं तेन च प्रययौ तदा ततः प्रणेदुः पांचालाः प्रहृष्टाः साधु
साध्विति ४१ हर्षाविष्टांस्ततश्चैतान्नेयं सेहे वसुंधरा भयापहो राजपुत्रः पांचालानां यशस्करः ४२ राज्ञः शोकापहो जात एष द्रोणव
धाय वै इत्युवाच महद्भूतमदृश्यं खेचरं तदा ४३ कुमारी चापि पांचाली वेदीमध्यात्समुत्थिता सुभगा दर्शनीयांगी स्वसितायतलोचना ४४
श्यामा पद्मपलाशाक्षी नीलकुंचितमूर्धजा ताम्रतुंगनखी सुभ्रूश्चारुपीनपयोधरा ४५ मानुषं विग्रहं कृत्वा साक्षादमरवर्णिनी नीलोत्पल
समो गंधो यस्याः क्रोशात्प्रधावति ४६ या बिभर्ति परं रूपं यस्या नास्त्युपमा भुवि देवदानवयक्षाणामीप्सितां देवरूपिणी ४७ तां चापि
जातां सुश्रोणीं वागुवाचाशरीरिणी सर्वयोषिद्वरा कृष्णा निनीषुः क्षत्रियान्क्षयं ४८ सुरकार्यमियं काले करिष्यति सुमध्यमा अस्या
हेतोः कौरवाणां महदुत्पत्स्यते भयं ४९ तच्छ्रुत्वा सर्वपांचालाः प्रणेदुः सिंहसंघवत् न चैतान्हर्षसंपूर्णानियं सेहे वसुंधरा ५० रा म०
प ३ १८४

४६ ॥ ४६ ॥ ४६ ॥ ४६ ॥ ४६ ॥ ४६ ॥ ४६ ॥ ॥ ॥ ॥ ॥ ॥

५१ ५२ धृष्टत्वात् प्रगल्भत्वात् धृष्णुत्वादितिपाठे पालनेशक्तत्वात् असंतं अमर्षं शत्रूत्कर्षासहिष्णुत्वं तद्युत्वात् । द्युम्नं वित्तं तेन बलशालत्व
मेवककवचकुंडलादिकं वा सहोत्पन्नं तं हार्दिर्यस्य शस्त्रात्क्षत्रशौर्यात् माहाद्वेरूपात् द्युम्नादितस्य द्रोणमवात् द्रोत्कर्षेरगा त्यक्तेम ५३ ५४ उपाकरोत् उप

नो दद्यात् पार्षती याजं प्रपेदे वै सुतार्थिनी न वै मदन्यां जननीं जानीयातामिमाविति ५२ तथेत्युवाच तं याजो राज्ञः प्रियचिकीर्षया ततस्तयो
स्तु नामनी चक्रुर्द्विजाः संपूर्णमानसाः ५२ धृष्टत्वादतिधृष्णुत्वाद्धृष्टद्युम्नाद्युत्संभवादपि धृष्टद्युम्नः कुमारोयं द्रुपदस्य भवत्विति ५३
कृष्णेत्येवाब्रुवन्कृष्णां कृष्णाभूत्सा हि वर्णतः तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे ५४ धृष्टद्युम्नं तु पांचाल्यमानीय स्वं निवेशनं
उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान् ५५ अमोक्षणीयं दैवं हि भावि मत्वा महामतिः तथा तत्कृतवान्द्रोण आत्मकीर्त्यनुर
क्षणात् ५६ इत्यादिपर्वणि द्रौपदीसंभवे वैशं एतच्छ्रुत्वा तु कौंतेयाः शल्यविद्धा इवाभवन् सर्वे चास्वस्थमनसो बभूवुस्ते महा
बलाः १ ततः कुंतीसुतान्दृष्ट्वा सर्वान्विहतचेतसः युधिष्ठिरमुवाचेदं वचनं सत्यवादिनी २ कुंत्युवाच चिररात्रोषिताः स्मेह ब्रा
ह्मणस्य निवेशने रममाणाः पुरे रम्ये लब्धभैक्षा महात्मनः ३ ॥

कृतवान् अस्त्रहेतोः अस्त्रदाने हेतुना राज्यार्द्धस्य हृतत्वात्तावतैवोपाकरोत् ५५ कीर्त्यनुरक्षणात् अस्य पांचाद्रोणोभयात्त्वविद्यादत्तवानिति
त्यकीर्तिः स्यात् ५६ अध्यायः एतच्छ्रुत्वा तु कौंतेया निस्पष्टार्थोध्यायः १ २ ३

आ० ४ ९ १० १२ द्रौपदीसंभवोध्यायश्चसमाप्तः वसन्तु मत्तस्त्विहत्युक्त्वाततःप्रागेवास गामेत्यर्थः १ ३ अपीतिकोमल्यामंत्रणे ४ ॥ ॥

१८५

यानीहरमणीयानिवनान्युपवनानिच सर्वाणितानिदृष्टानिपुनःपुनररिंदम ४ पुनर्दृष्टुंहितानीह प्रीणयंतिनननस्तथा भैक्ष्यंचनतथा
वीरलभ्यंतेकुरुनंदन ५ तेवयंसाधुपंचालान्गच्छामयदिमन्यसे अपूर्वदर्शनंवीररमणीयंभविष्यति ६ सुभिक्षाश्चैवपंचालाः
श्रूयंतेशत्रुकर्षण यज्ञसेनश्चराजासौब्रह्मण्यइतिशुश्रुम ७ एकत्रचिरवासश्चक्षमोनचमतोमम तेतत्रसाधुगच्छामोयदित्वंपु
त्रमन्यसे ८ युधिष्ठिरउ च भवत्यायन्मतंकार्यंतदस्माकंपरंहितं अनुजांस्तुनजानामिगच्छेयुर्नेतिवापुनः ९ वैशं ततःकुंतीभी
मसेनमर्जुनंयमजौचतथा उवाचगमनंतेचतथेत्येवाब्रुवंस्तदा १० ततआमंत्र्यतेविप्रंकुंतीराजन्सुतैःसह प्रत नगरींरम्यांद्रुप स्य ५
दस्यमहात्मनः ११ इत्यादिपर्वणिद्रौपदीसंभवेवेशोपायापन्नउ च वसत्सुतेषुप्रच्छन्नेपांडवेषुमहात्मसु आजगामाथतान्द्र
ष्टुंव्यासःसत्यवतीसुतः १ तमागतमभिप्रेक्ष्यप्रत्युद्गम्यपरंतपाः प्रणिपत्याभिवाद्यैनंतस्थुःप्रांजलयस्तदा २ समनुज्ञाप्यता
न्सर्वानासीनान्मुनिरब्रवीत् प्रच्छन्नपूजितःपार्थैःप्रीतिपूर्वमिदंवचः ३ अपिधर्मेणवर्त्तध्वं शास्त्रेणचपरंतपाः अपिविप्रेषु राम०
पूजावःपूजार्हेषुनहीयते ४ ॥ ॥ १८५

विलग्नमध्याकृशमध्या ६ ७ ८ ९ १० ११ १२ १३ पार्षतीपार्षतदुहिता १४ १५ १६ अध्यायः १६ ॥ ॥ ॥ ॥

श॰स्विनीम्॥ वरंवरय ३

स्ता

अथ धर्मार्थवद्वाक्यमुक्त्वा स भगवानृषिः विचित्रा अकथां स्तां पुनरेवेदमब्रवीत् ५ व्यास उ च आसीत्तपोवने काचिदृषेः कन्या महा
त्मनः विलग्नमध्या सुश्रोणी सुभ्रूः सर्वगुणान्विता ६ कर्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत नाध्यगच्छत्पतिं सा तु कन्या रूपवती सती
७ तपस्तप्तुमथारेभे पत्यर्थमसुखा ततः तोषयामास तपसा सा किलोग्रेण शंकरं ८ तस्याः स भगवांस्तुष्टस्तामुवाच यशस्विनीम् भद्रं ते वरदो
ऽस्मीति शंकरः ९ अथेश्वरमुवाचेदमात्मनः सा वचो हितं पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः १० तामथ प्रत्युवाचेदमीशा
नो वदतां वरः पंच ते पतयो भद्रे भविष्यंतीति भारत ११ एवमुक्ता ततः कन्या देवं वरदमब्रवीत् एकमिच्छाम्यहं देव त्वत्प्रसादा
त्पतिं प्रभो १२ पुनरेवाब्रवीद्देव इदं वचनमुत्तमं पंच कृत्वस्त्वया ह्युक्तः पतिं देहीत्यहं पुनः १३ देहमन्यं गतायास्ते यथोक्तं तद्भविष्य
ति द्रुपदस्य कुले जज्ञे सा कन्या देवरूपिणी निर्दिष्टा भवतां पत्नी कृष्णा पार्षत्यनिंदिता १४ पंचालनगरे तस्मान्निवसध्वं महाबलाः
सुखिनस्तामनुप्राप्य भविष्यथ न संशयः १५ एवमुक्त्वा महाभागः पांडवान्स पितामहः पार्थानामंत्र्य कुंतीं च प्रातिष्ठत महातपाः
१६ इत्यादिपर्वणि ॥ ॥

१६ ॥ १६ ॥ १६ ॥ १६ ॥ १६ ॥ १६ ॥ १६ ॥ १६ ॥ १६ ॥ १६ ॥ १६ ॥

आ० १८६

गते १ सोमाश्रयः चंद्रधरो रुद्रः तस्य स्थानं सोमाश्रयायणं २ ३ उल्मुकं ज्वलत्काष्ठं ३ ४ बलवत् अतिशयितं ५ ६ सर्वरात्रागमेषु पश्चिमस्यां दिशि अर्द्धा
स्तमिते अर्के सति रूपा या संरज्यते रक्ता भवति - तस्यां मुहूर्ते प्रस्थानकालं अशीतिभिर्लवैः निमेषाष्टैर्हीनं प्रचक्षते ७ तदेव मुहूर्त्तं यक्षादीनां कर्मचारेषु विहितं
अन्यत् मनुष्याणां कर्मचारेषु स्मृतमित्यन्वयः ८

स्थुः

वैशंपायन उवाच गते भगवति व्यासे पांडवा हृष्टमानसाः ते प्रतस्थुः पुरस्कृत्य मातरं पुरुषर्षभाः १ समैरुदङ्मुखैर्मार्गैर्यथोद्दिष्टं परंतपाः ते त्व
गच्छन्नहोरात्रात्तीर्थं सोमाश्रयायणं २ आसेदुः पुरुषव्याघ्रा गंगायां पांडुनंदनाः उल्मुकं तु समुद्यम्य तेषामग्रे धनंजयः प्रकाशार्थं ययौ त
त्र रक्षार्थं च महारथाः ३ तत्र गंगाजले रम्ये विविक्ते क्रीडयन्स्त्रियः ईर्षुर्गंधर्वराजो वै जलक्रीडामुपागतः ४ शब्दं तेषां स शुश्राव नदीं समुप
सर्पतां तेन शब्देन चाविष्टश्चुक्रोध बलवद्बली ५ स दृष्ट्वा पांडवांस्तत्र सह मात्रा परंतपान् विस्फारयन्धनुर्घोरमिदं वचनमब्रवीत् ६ सं
ध्या संरज्यते घोरा पूर्वरात्रागमेषु या अशीतिभिर्लवैर्हीनां तन्मुहूर्तं प्रचक्षते ७ विहितं कामचाराणां यक्षगंधर्वरक्षसां शेषमन्यन्म
नुष्याणां कर्मचारेषु वै स्मृतं ८ लोभात्प्रचारं चरतस्तासु वेलासु वै नरान् उपक्रांतान्निगृह्णीमो राक्षसैः सह बालिशान् ९
अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः गर्हयंति नरान्सर्वान्बलस्थान्नृपतीनपि १० ॥

राम० १८६

अन्यत् मनुष्याणां कर्मचारेषु स्मृतमित्यन्वयः संध्यायाम शीतिलवोपरि रात्रौ यक्षादीनामेव सेवाकालः अन्यः तद्दृष्टं मनुष्याणामित्यर्थः ८ जलं प्राप्नुवतो न
रान् ९ १० ॥ छ ॥ छ ॥

११ १३ न नेहसाः शृङ्गिणो वा न च देवा न जनस्तु तः कुबेरस्य पौलोमं किं मां समुपसर्पथेति प्राचीनः पाठो देवबोधादिभिर्व्याख्यातत्वात् हसंति विकसंतीति जसाः न
मं नो हसाः पेयं तेन हसाः भक्तानुग्राहकाः देवाः सर्वत्राप्रतिहतगतयस्ते भवंतोऽपसर्पत्वात्। कौणपा इति पाठे तु राक्षसाः कपालाकृतयो रुण्डनरमाहृतित्वात् न
कुलस्य इति पाठे पिसंख्यावार्थे कुत्सरंति अनेन पंतिन कुलसाः कुलंकं टंकाड्यर्थः शृङ्गिणः कापालिकाः आभीचारिणो वीरसाधनादिपराः तेपि निशीथे जलस्प

घं

आगच्छत मामा समीपमुपसर्पत कस्मान्मां नाभिजानीत प्राप्तं मां भागीरथीजलं १२ अङ्गारपर्णं गंधर्वं वित्त मां स्वबलाश्रयं अहं हि मानी
चेर्ष्युश्च कुबेरस्य प्रियः सखा १२ अङ्गारपर्णमित्येवं ख्यातं चेदं वनं मम अनु गङ्गां च वामं च चित्रं यत्र रमाम्यहं १३ न कौणपाः शृङ्गि
णो वा न देवा न च मानुषाः इदं समुपसर्पन्ति तत्किं समनुसर्पथ १४ अर्जुन उ० समुद्रे हिमवत्पार्श्वे गङ्गायां च दुर्मते रात्रावह
नि संध्यायां कस्य गुप्तः परिग्रहः १५ भुक्तो वाप्यथवाभुक्तो रात्रावहनि खेचर न कालनियमो ह्यस्ति गङ्गां प्राप्य सरिद्वरां १६ ॥

वेश्याः न च मंत्राः कपालादिशिश्चि हि शुक्ष्मासुरश्येतेन च देवा न जनस्तु जः देवानां संबंधी निश्रेयनारीनि दिव्यहर्षिषु प्रदानि स्वजश्च आकाशादिगतिप्रदा पे
षु संतीति गंधर्वे पश्चाद्यत्तुल्मुकधारित्वात् जले शब्दकरत्वाच्च यस्य दिसंधविद्यामप्यज्ञातत्वात् कुबेरस्य डमीमुपतिति ह स्मां कथं जानीयेत्यर्थः १४ पतु
रात्रौ जलेन स्प्रष्टव्यमित्युक्तं तत्राह समुद्रे इति पैमिवो स्मीषं शिरोमंडनम् तं मां किं समुपसर्पथेति पाडपपापापद्धा कुबेरस्य कुत्सितशरीरस्य द्वीनशब्दे प
श्यारुडसीषंपः कश्चित्तदेव पाडपै ... १५ १६

अ० २८९

अहं हिमानीत्युक्तं तत्राह वयमिति। अघस्यामर्षितवंतः ७ सप्तधावल्लोकसागानलिनीपावनीसीताचक्षुःसिंधुरलकनंदेति सप्तधा गत्वा समुद्रं अंभः समपद्यते
नियोजना १८ १९ अपर्युषितपापाः निशोषितपापाः एकं आकाशरूपं वप्रं तटं यस्याः तत्ठं यमिति मंदाकिनी २० २१ असंबाधा निःसंकटा इतरनदीवत् प्रावृषि

श्री

वयंच शक्तिसंपन्ना अकाले त्वाम असुम अशक्ता हि रोद्धुं युष्मान्वेति मानवाः १७ पुरा हिमवतः श्रेष्ठा हैमशृंगाद्विनिःसृता। गंगा गत्वा
समुद्रांभः सप्तधा समपद्यत १८ गंगां च यमुनां चैव प्लक्षजातां सरस्वतीं रथस्थां शरयूं चैव गोमतीं गंडकीं तथा १९ अपर्युषितपापास्ते न
दीः समुपयिवंति पे इयं भूत्वा चैकवप्रा शुचिराकाशगा पुनः २० देवेषु गंगा गंधर्वी प्राप्नोत्यलकनंदतां तथा पितॄंश्चैतरणी दुस्तरा पापकर्मभिः गं
गा भवति वै प्राप्य कृष्णद्वैपायनोऽब्रवीत् २१ असंबाधा देवनदी स्वर्गसंपादनी शुभा कथमिच्छसि तां रोद्धुं नैष धर्मः सनातनः २२ अनिवार्यमसं
बाधं तव वाचा कथं वयं देवनदीं संस्पृशेम यथाकामं पुरा त्वं भागीरथीजलं २३ वैशं अंगारपर्णस्तच्छ्रुत्वा क्रुद्ध आनम्य कार्मुकं मुमोच बाणा
न्निशितानहीनाशीविषानिव २४ उल्मुकं भ्रामयंस्तूर्णं पांडवश्चर्म चोत्तरं व्यपोहत शरांस्तस्य सर्वानेव धनंजयः २५ अर्जुन उ० च विभीषि
का वै गंधर्व नास्त्रज्ञेषु प्रयुज्यते अस्त्रज्ञेषु प्रयुक्तेयं फेनवत्प्रविलीयते २६

रजस्वलात्वेन ह्रासमप्यहं स्पर्शत्वं न प्राप्नोतीत्यर्थः २१ २३ अहीन् सर्पान् आशीविषान् विषदंष्ट्रान् २४ चर्म छत्राकारं आयुधपातत्राणं व्यपोहत अ राम०
पसारितवान् २५ २६ ॥ २८९

मानुषानतिमानुषाधिकान्लक्ष्ये तोदिव्येनास्त्रेणायोस्पे २९ ३० विमुक्तं ग्यास्तुतोऽत्र तरवन्नमद्वं ३१ ३४ स्त्रीनायोरहितायस्पतं ३५ ३६ अत्रे

[illegible]

८३ ८१

मानुषानतिगांधर्वान्सर्वान्गंधर्वलक्ष्ये तस्मादस्त्रेणादिव्येनयोत्स्येहं नतु मायया २७ पुरास्त्रमिदमाग्नेयं प्राह्यत्किल बृहस्पतिः भरद्वाजा
य गंधर्वगुरुमान्यः शतक्रतोः २८ भरद्वाजादग्निवेश्य अग्निवेश्याद्गुरुर्मम साध्विदं मं मद्दद्द्रोणो ब्राह्मणसत्तमः २९ वैशं इत्युक्त्वा
पाण्डवः क्रुद्धो गंधर्वाय मुमोचह प्रदीप्तमस्त्रमाग्नेयं ददाहास्य रथं तुतत् ३० विरथं वि प्लुतं तं तु स गंधर्वे महाबलः अस्त्रतेजः प्रमूढं च प्रपतंत
मवाङ्मुखं ३१ शिरोरुहेषु जग्राह माल्यवत्सु धनंजयः भ्रातृन्प्रति चकर्षाथ सोस्त्रपातादचेतसं ३२ युधिष्ठिरं तस्य भार्या प्रपेदे शरणार्थि
नी नाम्ना कुंभीनसी नाम पतित्राणमभीप्सती ३३ गंधर्व्युवाच त्रायस्व मां महाभाग पतिं चेमं विमुंच मे गंधर्वी शरणं प्राप्ता नाम्ना कुंभीन
सी प्रभो ३४ युधिष्ठिर उवाच युद्धे जितं यशोहीनं स्त्रीनाथमपराक्रमं को निहन्याद्रिपुं तात मुंचेमं रिपुसूदन ३५ अर्जुन उवाच जीवितं प्र
तिपद्यस्व गच्छ गंधर्व मा शुचः प्रदिशत्यभयं तेद्य कुरुराजो युधिष्ठिरः ३६ गंधर्व उवाच जितोहं पूर्वकं नाम मुंचाम्यंगारपर्णतां नच श्लाघे
बलेनाग्ने नाम्ना जनसंसदि ३७ साध्विमं लब्धवांल्लाभं योहं दिव्यास्त्रधारिणा गांधर्व्या मायया च्छामि संयोजयितुमर्जुन ३८ ॥ ॥

गारवत् माम्बरं दः सर्वोचपर्णी वाहनं रथोयस्य सोंगारपर्णीः तस्य भाव स्तत्तां ३७ लाभं लाभवत् सुखदं स्तवायं ३८ ३८ ॥ ॥ ॥ ॥

श्रा० संभृतार्जितातपसा ४० प्राणैर्वियुज्येतनहन्यात् ४१ ३ यदिति तत्रधर्मस्वरूपंपरस्परंतयाद्रष्टुंप्रवृत्तविशिष्टःसमान्यतोविशेषतश्चसर्वंसर्वाविवस्थंव
१८८ स्तुसर्वदास्वस्वसंकल्पानुसारेणपश्येदित्यर्थः ४४ अनुनेष्यामियक्ष्यात्माप्यापयिष्यामि ४५ विशेषिताःविशिष्टःअतिविशिष्यमनुल्याःअनुभावस्त्वा

पा३

अस्त्राग्निनाविचित्रोपंदग्धोमेरपन्नगः। सोहंचित्ररथोनाम्नात्वानामनाद्दग्धरथोभवं ३९ संभृतांचैवविविधंतपसेहमयापुरा निवेदयिष्ये
तामद्यप्राणदायमहात्मने ४० संस्तंभयित्वातरसाजितंशरणमागतं योरिपुंयोजयेत्प्राणैःकल्याणंकिंनसोर्हति ४१ चाक्षुषीनामविद्ये
प२ यंसोमायप्रददौमनुः ददौसविश्वावसवेममविश्वावसुर्ददौ ४२ सेयंकापुरुषंप्राप्तगुरुदत्ताप्रणश्यति आगमोस्यामयाप्रोक्तोवीर्यंप्रतिनि
बोधमे ४३ यच्चक्षुषाद्रष्टुमिच्छेत्त्रिषुलोकेषुकिंचन तत्पश्येद्यादृशंचेच्छेत्तादृशंद्रष्टुमर्हति ४४ एकपादेनषण्मासान्स्थितोविद्यां
लभेदिमां अनुनेष्याम्यहंविद्यांस्वयंतुभ्यंव्रतेकृते ४५ विद्ययाह्यनयाराजन्वयंनृभ्योविशेषिताः अविशिष्टाश्चदेवानामनुभावप्रव
र्तिनाः ४६ गंधर्वजानामश्वानांमहंपुरुषसत्तम भ्रातृभ्यस्तवतुभ्यंचपृथग्दाताशतंशतं ४७ देवगंधर्ववाहास्तेदिव्यवर्णाम
नोजवाः क्षीणाःक्षीणाभवंत्येतेनहीयंतेचरंहसः ४८

काशनमनादृष्टत्वादेःप्रवर्तिनः दर्शनशीलाः ४६ ४७ क्षीणाश्चक्षीणाश्चक्षीणाक्षीणा दृष्टान्तकरणवा तेनभवंतिरंहसोवेगाच्चनहीयंतेइतिन
कारानुषंगेणयोज्यो। क्षीणाःक्षीणाइतिपाठेसमर्थाःसमर्थइत्यर्थःऐश्वर्यार्थस्यक्षपतेःकर्तरिनिष्ठापोरेक्षीणात्वंच एतेरंहसोवेगातिशयात्त्रही रा०म०
यंतेपितुअधिकमधिकंसमर्थाभवंतीत्यर्थः ४८ १८८

अस्थ्नामुत्पत्तिमाह चतुर्भिः पुरेति ४९ भागीकृतः शरीरीत्वादनेकधा भग्ना वज्रभागाः तेषु तेषु स्थानेषु देवैरुपास्यते स्थानान्येव सामान्यतो विशेषतश्चाह लोके इति यशोधनं उत्कर्षं स्वरूपेणापि च सैव वज्रस्य स्वरूपं सैवेति विधिपरिग्रहे यज्ञपात्रीत्वात् स्वयं सिद्ध्यानपरि सा वै वज्रं वस्तु मिश्रितिवत् ५ ब्राह्मणस्य पाणिः हविःप्रदत्वात् वज्रा इतरेषां आर्त्विज्याभावेन हविःप्रदेयानर्हत्वात् अतः सा देवैरुपास्यते १ पाणिर्हि देवब्राह्मणादिद्विषां नाशहेतुत्वात्

पुराकृतं महेन्द्रस्य वज्रं वज्रनिबर्हणं दशधा शतधा चैव तच्छीर्णं वज्रमर्दनि ४९ ततो भागीकृतो देवैर्वज्रभागाद्युपास्यते लोके
यशोधनं किंचित्सा वै वज्रं तनु स्मृता ५० वाग्वज्रो ब्राह्मणस्यास्यात्क्षत्त्रं वज्ररथं स्मृतं वैश्या वै दानवज्राश्च कर्मवज्रा यवीयसः
५१ कृतवज्रस्य भागेन अवध्या वाजिनः स्मृताः रथांगं वडवास्तेनु राज्ञश्चाश्वेषु पेयताः ५२ कामवरणिः कामजवाः कामतः
समुपस्थिताः इति गांधर्वजाः कामं स्मरापि यान्तिमहयाः ५३

कृत्रे देवोपास्यं दानकर्मणोरपि ब्रह्मक्षत्त्रप्रीतिकरत्वाद्वज्रत्वं तेन वज्रवंतो ब्राह्मणादयो देवैरुपजीव्यंत इत्यर्थः ५१ प्रकृते किमायातं तत्राह कृतेति कृतं देवोपास्यं तस्य भागेन अंशत्वेन अवधाः अवधिभूता वाजिनो वेगवंतः १ यस्य वज्रत्वे अस्थ्नो स्कंधे शरवमुख्यं कारणं वधजादिकमित्यर्थः १२ रथांगं रथवज्रं रूपः
यचालकं अश्वानां वडवास्त्र अश्वायै राज्ञे चरथांगं रथिनां तुल्यो महद्धस्त्यर्थः ५२ स्त्रीयेष्वश्वेषु विशेषमाह कामेति गांधर्वजाः गंधर्वलोकजाः ५३

शर८

प्रीतेनदत्तमपिप्रतिप्रदानमंतरेणोच्चेपादत्ततिप्रतिषेध द्रव्यतिथ्यमाख्यातिपछति मुक्केभोजयतेवैवषष्ठिंप्रीतिलक्षणामित्युक्तेः अनयाच्चाशीत्वंममस्यादिति
मावत्पक्षांतरेतुम मयशोहानिः ५० आद्यपक्षमादत्तेसंयोगइत्यादिना ५५ ६ युष्मभ्यःयुष्मत्तः यत्पस्माद्धेतोः ५१ = अनग्नयःदारहीनत्वात् अना

अर्जुनउ च यदिप्रीतेनमेदत्तंसंशयेजीवितस्यवा विद्याधनंश्रुतंवापिनतद्गंधर्वरोचये ५४ गंधर्वउ च संयोगोवैप्रीतिकरोमहत्सुप्रतिदृश्य
ते जीवितस्यप्रदानेनप्रीतोविद्यांददामिते ५५ त्वत्तोप्यहंग्रहीष्यामिअस्त्रमाग्नेयमुत्तमं तथैवयोग्यंवीभत्सोचिरायभरतर्षभ ५६ अर्जु
नउ च त्वत्तोस्त्रेणावृणोम्यस्त्वान्नंयोगःशाश्वतस्तुनौ सखेतद्ब्रूहिगंधर्वयुष्मभ्यः [illegible] इयेमवेत् ५७ कारणंब्रूहिगंध
र्वकिंतयेनस्मधर्षिताः यांतोवेदविदःसर्वेसंतोरात्राविरिंदमाः ५८ गंधर्वउ च अनग्नयोनाहुतयोनचविप्रपुरस्कृताः इयंततोधर्षिताः
स्थमयावैपांडुनंदनाः ५९ यक्षराक्षसगंधर्वाःपिशाचोरगदानवाः विस्तरंकुरुवंशस्यधीमंतःकथयंतिते ६० नारदप्रभृतीनांतुदे
वर्षीणांमयाश्रुतंगुणान्कथयतोवीरपूर्वेषांतवधीमतां ६१ स्वयंचापिमयादृष्टश्चरतासागरांवरां इमांवसुमतींकृत्स्नांप्रभावःसु
कुलस्यते ६२ वेदेधनुषिचाचार्यमभिजानामितेर्जुनविश्रुतं त्रिषुलोकेषुभारद्वाजंयशस्विनं ६३ ॥ ॥ ॥ ॥

द्गतयःसमावर्तत्वात् आश्रमविशेषहीनोब्राह्मणोधर्षणीयइत्यर्थः ६३ ॥ ७ ॥ ७ ॥ ३ ॥ ३ ॥ ३ ॥ ३ ॥

६४ ६५ मनोबुद्धिंमनःसहितांबुद्धिंसंकल्पनिश्चयौ भाविमात्मनोशोधितचित्तानां ६६ वाकुद्रविणां वाकुद्रविणांवाकुद्रवलं ६६ ६७ ६८ ६९ ७०

भस्मा५

धर्मवायुंवशक्रंचविज्ञानाम्यश्विनौतथा पांडूंचकुरुशार्दूलषडेतान्कुरुवर्धनान् पितृनेतानहंपार्थदेवमानुषसत्तमान् ६४ दिव्यात्मानो
महात्मानःसर्वशस्त्रभृतांवरः भवंतोभ्रातरःशूराः सर्वेसुचरितव्रताः ६५ उत्तमांचमनोबुद्धिंभवतांभावितात्मनां जानन्नपिचवःपार्थेक्
तवानिहधर्षणां ६६ स्त्रीमुकाशोचकौरव्यनपुमांर्हंतुमर्हति धर्षणामात्मनःपश्यन्वाक्‍दुद्रविणमाश्रितः ६७ नक्केचवलमस्माकंभ्र
यएवाभिवर्द्धते यतस्ततोमांकौंतेयसदारंमन्युराविशत ६८ सोहंत्वयेहविजितःसख्येतापत्यवर्द्धन येनतेनेहविधिनाकीर्त्यमानंनिवा
धमे ६९ ब्रह्मचर्यपरोधर्मःसचापिनियतस्त्वयि यस्मात्तस्मादहंपार्थरणेस्मिविजितस्त्वया ७० यस्तुस्यात्क्षत्रियःकश्चित्कामवृत्तः
परंतपः नक्केचयुधियुध्येतनसजीवेत्कथंचन ७१ यस्तुस्यात्कामवृत्तोपिपार्थब्रह्मपुरस्कृतः जयेन्नक्तंचरान्सर्वान्सपुरोहित
धूर्गतः ७२ तस्मात्तापत्ययत्किंचिन्नृणांश्रेयइहेप्सितं तस्मिन्कर्मणियोक्तव्यादांतात्मानःपुरोहिताः ७३ वेदेषडंगेनिरताःशु
चयःसत्यवादिनः धर्मात्मानःकृतात्मानःस्युर्नृपाणांपुरोहिताः ७४ जयश्चनियतोराज्ञःस्वर्गश्चतदनंतरं यस्यस्याद्धर्मविद्वा
ग्मीपुरोधाःशीलवाञ्छुचिः ७५

७१ कामवृत्तःस्वच्छंदाचारः ७३ ७४ ७५ ॥ ई ॥ ई ॥ ई ॥ ई ॥ ॥ ॥ ई ॥ ॥

रा० १७० लामंलक्षधंषनं १६ ७७ ७९ अध्यायः तापत्य [त] पुरोहितप्रसादाद्देवतापत्यलंरव्यापयितुंतापत्येतिसंबोधनंकृतंतद्दर्शयन्नाह इति तापत्यइति तापत्यार्थ

प ४

लाभंलब्धुमलब्धंवालब्धंवापरिरक्षितुं पुरोहितंप्रकुर्वीतराजागुणसमन्वितं ७६ पुरोहितमतेनैतिष्ठेद्य इच्छेद्भूतिमात्मनः प्राप्तुंवसुमतीं
सर्वांसर्वशःसागरांवरां ७७ नहिकेवलशौर्येणतापत्याभिजनेनच जयेद्ब्राह्मणःकश्चिद्भूमिंभूमिपतिःक्वचित् ७८ तस्मादेवंविजानी
हिकुरूणांवंशवर्द्धन ब्राह्मणप्रमुखंराज्यंशक्यंपालयितुंचिरं ७९ इत्यादिपूर्वोक्तितापत्ये अर्जुनेन च तापत्यइतियद्वाक्यमुक्तवानस्मिमा
मिह तदहंज्ञातुमिच्छामितापत्यार्थविनिश्चयं १ तपतीनामकाचैषातापत्यायत्कृतेवयं कौंतेयाहिवयंसाधोतत्त्वमिच्छामिवेदितुं २ वै
शंपायनउ च एवमुक्तःसगंधर्वःकुंतीपुत्रंधनंजयं विश्रुतांत्रिषुलोकेषुश्रावयामासवैकथां ३ गंधर्वउ च हंततेकथयिष्यामिकथा
मेतांमनोरमां यथावदखिलांपार्थसर्वबुद्धिमतांवर ४ उक्तवानस्मियेनत्वांतापत्यइतियद्वचः तत्तेहंकथयिष्यामिशृणुष्वैकमना
भव ५ यएषदिविधिष्ण्येननाकंव्याप्नोतितेजसा एतस्यतपतीनामबभूवसदृशीसुता ६ विवस्वतोवैदेवस्यसावित्र्यवरजाविभो
विश्रुतात्रिषुलोकेषुतपतीतपसायुता ७ नदेवीनासुरीचैवनयक्षीनचराक्षसी नाप्सरानचगंधर्वीतथारूपेणकाचन ८ छ

तापत्यपर्वार्थ १ २ ३ ४ ५ ६ ५ ६ विस्मेनमंडलेन ६ ७ ८ ॥ ३ ३ ॥ ३ ॥ ३ ॥ ३ ॥ छ

राम० १७०

९ १० संप्रदानंदानयात्रं ११ १२ १३ १४ १५ १६ १७ १८ सुहृदांदुर्हृदामपिमध्येश्रीमान् १९ २० ॥ ॥ ॥ ॥ ॥

५२

सुविभक्तानवद्यांगीस्वसितायतलोचना स्वाचाराचैवसाध्वीचसुवेशाचैवभामिनी ९ नतस्याःसदृशंकिंचित्त्रिषुलोकेषुभारत भर्त्तारंस
वितामेनेरूपशीलगुणश्रुतैः १० संप्राप्तयौवनांपश्यन्देयांदुहितरंतुतां नोपलेभेततःशांतिंसंप्रदानंविचिंतयन् ११ अथर्क्षपुत्रः
कौंतेयकुरूणामृषभोबली सूर्यमाराधयामासनृपःसंवरणस्तदा १२ अर्घ्यमाल्योपहाराद्यैर्गंधैश्चनियतःशुचिः नियमैरुप
वासैश्चतपोभिर्विविधैरपि १३ शुश्रूषुरनहंवादीशुचिःपौरवनंदनः अंशुमंतंसमुद्यंतंपूजयामासभक्तिमान् १४ ततःकृत
ज्ञंधर्मज्ञंरूपेणासदृशंभुवि तपत्याःसदृशंमेनेसूर्यःसंवरणंपतिं १५ दातुमैच्छत्ततःकन्यांतस्मैसंवरणायतां नृपोत्तमायकौरव्यवि
श्रुताभिजनायच १६ यथाहिदिविदीप्तांशुःप्रभासयतितेजसा तथाभुविमहीपालोदीप्त्यासंवरणोभवत् १७ यथार्चयंतिचादि
त्यमुद्यंतंब्रह्मवादिनः तथासंवरणंपार्थब्राह्मणावरजाःप्रजाः १८ ससोममतिकांतत्वादादित्यमतितेजसा बभूवनृपतिःश्रीमा
न्सुहृदांदुर्हृदामपि १९ एवंगुणस्यनृपतेस्तथावृत्तस्यकौरव तस्मैदातुंमनश्चक्रेतपतींतपनःस्वयं २० ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री०
२९१

२१ २२ २४ २५ २६ २७ रूपगुल्मं द्रुस्वशाखंशिफः रूक्षुपः २८ २९ ३० ३१ ३२ ॥ ह्॥ ह्॥ ह्॥ ह्॥ ह्॥ ह्॥

स कदाचिद् धरो राजा श्रीमानमितविक्रमः चचार मृगयां पार्श्वपर्वतोपवने किल २१ चरतो मृगयां तस्य क्षुत्पिपासासमन्वितः ममा
र राजः कौन्तेय गिरावप्रतिमो हयः २२ समन्तान्मार्गयन्त्या[illegible]र्थं पश्यन्नामेव गिरौ नृपः ददर्श स ददर्शी लोकैककन्यामायतलोचनां २३ स
एक एकामासाद्य कन्यां परबलार्दनः तस्थौ नृपतिशार्दूलः पश्यन्न विचचलेक्षणाः २४ स हि तां तर्कयामास रूपतो नृपतिः श्रियं पु
नः संतर्कयामास रवेर्भ्रष्टामिव प्रभां वपुषा वर्चसा चैव शिखामिव विभावसोः प्रसन्नत्वेन कान्त्या च चन्द्रे रेखामिवामलां २६ गि
रिप्रस्थे तु सा यस्मिन्स्थिता ह्यसितलोचना विभ्राजमाना शुशुभे प्रतिमेव हिरण्मयी २७ तस्या रूपेण स गिरिर्वेषेण च विशेषतः
स सवृक्षक्षुपलतो हिरण्मय इवाभवत् २८ अवमेने च तां दृष्ट्वा सर्वप्राणभृतां वपुः अवाप्तं चात्मनो मेने स राजा चक्षुषः
फलं २९ जन्मप्रभृति यत्किंचिद् दृष्टवान्स महीपतिः रूपं न सदृशं तस्यास्तर्कयामास किंचन ३० तया बद्धमनश्चक्षुः राम०
पाशैर्गुणमयैस्तदा न चचाल ततो देशाद् बुबुधे न च किंचन ३१ अस्या नूनं विशालाक्ष्याः सदेवासुरमानुषं लोकं निर्मथ्य २९१
धात्रेदं रूपमाविष्कृतं कृतं ३२

३३ ३५ ३८ मत्तेवकाशतशशिमत्तकाशिनी ३९ ४० ४२ वनजपत्राक्षीजलजपत्राक्षी ४३ ४४ अध्यायः ॥ ॥ ॥ ॥ ॥

एवंसतर्कयामासरूपद्रविणसंपदा कस्मामसदृशीलोकेनृपःसंवरणस्तदा ३३ तांचदृष्ट्वैवकल्याणींकल्याणाभिजनोनृपः
जगाममनसाचिंताकामबाणेनपीडितः ३४ दह्यमानःसतीव्रेणनृपतिर्मन्मथाग्निना अप्रगल्भांप्रगल्भस्तांतदोवाचमनोहरा
३५ कासि [illegible] कस्यासिरंभोरु किमर्थंचेहतिष्ठसि कथंचनिर्जनेरण्येचरस्येकाशुचिस्मिते ३६ त्वंहिसर्वानवद्यांगी
सर्वाभरणभूषिता विभूषणमिवैतेषांभूषणानामभीप्सितं ३७ नदेवींनासुरींचैवनयक्षींनचराक्षसीं नचभोगवतींमन्येन
गंधर्वीनमानुषी ३८ याहिदृष्टामयाकाश्चिच्छ्रुताश्चापिवरांगनाः नतासांसदृशींमन्येत्वामहंमत्तकाशिनि ३९ दृष्ट्वैवचा
रुवदनेचंद्रात्कांततरंतव वदनंपद्मपत्राक्षिमांमथ्नातीवमन्मथः ४० एवंतांसमहीपालोबभाषेनतुसातदा कामार्त्तंनि न४
र्जनेरण्येप्रत्यभाषतकिंचन ४१ ततोलालप्यमानस्यपार्थिवस्यायतेक्षणा सौदामिनीवचाभ्रेषुतत्रैवांतरधीयत ४२ ता
मन्वेषुंसनृपतिःपरिचक्रामसर्वतः वनंवनजपत्राक्षीमुन्मत्तवत्तदा ४३ अपश्यमानःसतुतांबहुतत्रविलप्य
च निश्चेष्टःपार्थिवश्रेष्ठोमुहूर्त्तंसव्यतिष्ठत ४४ इत्यादिपर्वणितापत्ये ॥ ॥

॥४४ ॥३॥ ३॥ ३॥ ३॥ ३॥ ३॥३॥ ३॥ ३॥ ३॥ ३॥ ३॥ ३॥

आ०
२८२

अथ १ २ ३ प्रहसन्नसमइव आविष्कृतप्रख्यातः स्त्रीलिंगयाहेतुआविर्भूतास्मि ४ ५ ६ प्रजहंतिप्रजहति ७ ८ अनाक्रंदेअवान्तरिका

क्षोति ३

गंधर्वेंद्र च अथ तस्यामदृश्यायां नृपतिः काममोहितः पातनः शत्रुसंघानां पपात धरणीतले १ तस्मिन्निपतिते भूमाववपसा
चारुहासिनी पुनःपीनायतश्रोणी दर्शयामास तं नृपं २ अथावभाषे कल्याणी वाचा मधुरया नृपं तं कुरूणां कुलकरं कामा
भिहतचेतसं ३ उवाच मधुरं वाक्यं तपती प्रहसन्निव उत्तिष्ठ भद्रं ते न त्वमर्हस्यरिंदम ४ मोहं नृपतिशार्दूल गंतुमाविष्कृतः क्षि
तौ एवमुक्तोथ नृपतिर्वाचा मधुरया तदा ददर्श विपुलश्रोणीं तामेवाभिमुखे स्थितां ५ अथ तामसितापांगीमावभाषे सपा
र्थिवः मन्मथाग्निपरीतात्मा संदिग्धाक्षरया गिरा ६ साधु त्वमसितापांगि कामार्त्तं मत्तकाशिनी भजस्व भजमानं मां प्राणा हि
प्रजहंति मां ७ त्वदर्थं हि विशालाक्षि मामयं निशितैः शरैः कामः कमलगर्भाभे प्रतिविध्यन्न शाम्यति ८ दष्टमेवमनाक्रंदे
भद्रे कामहाहिना सा त्वं पीनायतश्रोणि मामाप्नुहि वरानने ९ त्वदधीना हि मे प्राणाः किंनरोद्गीतभाषिणि चारुसर्वान
वद्यांगि पद्मेंदुप्रतिमानने १० न त्वहं त्वदृते भीरु शक्ष्यामि खलु जीवितुं कामः कमलपत्राक्षि प्रतिविध्यति मामयं ११
म २ घे १ तस्मात्कुरु विशालाक्षि मय्यनुक्रोशमंगने भक्तं मामसितापांगि न परित्यक्तुमर्हसि १२ ॥

राम०

ले आक्रंदः कंदने क्लानेमित्रराहराप्रद्वयोः आतपपिचयुंस्त्रियामितिमेदिनी ९ १० ११ १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ २८२

१३ रोचते रुचिर्भवति १४ १६ भूपः अधिकं अहारः हृतवानसि १७ तर्हि किं पतां संगरीतिवेत्त्वाहनचेति १८ १९ २० २१ २ अध्यायः ॥ ॥ एवं १ अनुयात्रैः शि

भ.क्र.मं १

त्वं हि मां प्रीतियोगेन चातुमर्हसि भाविनि त्वद्दर्शनकृतस्नेहं मनश्चलति मे भृशं १३ नत्वां दृष्ट्वा पुनरन्यां द्रष्टुं कल्याणि रोचते प्रसीद वशगोहं ते भज
भाविनी १५ दृष्ट्वैव त्वां वरारोहे मन्मथो भ्रामं गते अंतर्गतं विशालाक्षि विध्यति स्म पतत्रिभिः १५ मन्मथाग्निसमुद्भूतं दाहं कमललोचने ५१
प्रीतिसंयोगयुक्ताभिरद्भिः प्रह्लादयस्व मे १५ पुष्पायुधं दुराधर्षं प्रचंडशरकार्मुकं त्वद्दर्शनसमुद्भूतं विध्यंतं दुःसहैः शरैः १७ उपशामय
कल्याणि आत्मदानेन भाविनि गांधर्वेण विवाहेन मामुपैहि वरांगने १८ विवाहानां हि रंभोरु गांधर्वः श्रेष्ठ उच्यते तपत्युवाच नाहमीशात्मनो
राजन्कन्यापितृमती ह्यहं मयि चेद्स्ति ते प्रीतिर्याचस्व पितरं मम यथा हि ते मया प्राणाः संगृहीता नरेश्वर दर्शनादेव भूयस्त्वं तथा प्राणान्म
माहरः २० नचाहमीशा देहस्य तस्मान्नृपतिसत्तम समीपं नोपगच्छामि नस्वतंत्राहि योषितः २१ का हि सर्वेषु लोकेषु विश्रुता
भिजनं नृपं कन्या नाभिलषेत्नाथं भर्तारं भक्तवत्सलं २२ तस्मादेवं गते काले याचस्व पितरं मम आदित्यं प्रणिपातेन तपसा नियमेन च २३
स चेत्कामयते दातुं तव मामरिसूदन भविष्याम्यथ ते राजन्सततं वशवर्तिनी २४ अहं हि तपती नाम सावित्र्यवरजा सुता अस्य लोकप्रदीप
स्य सवितुः क्षत्रियर्षभ २५ इत्यादिपर्वणि तापत्ये गंधर्व उवाच एवमुक्त्वा ततस्तूर्णं जगामोर्ध्वमनिंदिता स तु राजा पुनर्भूमौ तत्रैव निपपा
त ह १ अन्वेषमाणाः सबलः तं राजानं नृपोत्तमं अमात्यः सानुयात्रश्च तं ददर्श महावने १ ॥ छ ॥ छ ॥ छ ॥ छ॥ छ

५२

विरमोराघाहृतेभिः सहितः सा[illegible]नुयात्रः २ ॥ २ ॥ २ ॥ २॥ २ २ २॥ २॥ २॥ ४ राम छ छ छ छ छ

श्रीः
२८३

निरस्तंतपत्यातपक्रं ३ आगतसंभ्रमः जातभयः ४ ५ ६ ७ ८ पुंडरीकपुंजेनसुगंधिना उशीरमूलेननिर्मितंमुकुटंराज्ञापनपार्श्वे राज्ञः शिरसिनिहितमात्रं अ

च्छ्रि१

द्भितोनिपतितंकालेशक्रध्वजमिवो तं तंहिदृष्ट्वामेहाघासंनिरस्तंपतितंभुवि ३ बभूवसोऽस्यसचिवः संप्रदीप्तइवाग्निना त्वरयाचोपसंगम्य
स्नेहादागतसंभ्रमः ४ तंसमुत्थापयामासनृपतिंकाममोहितं भूतलाद्भूमिपालेशंपितेवपतितंसुतं ५ प्रज्ञयावयसाचैववृद्धःकीर्त्या
नयेनच अमात्यस्तंसमुत्थाप्यबभूवविगतज्वरः ६ उवाचचैनंकल्याणयावाचामधुरयोत्थितं माभैर्मनुजशार्दूलभद्रमस्तुतवानघ ७
क्षुत्पिपासापरिश्रान्तंतर्कयामासवैनृपं पतितंपातनंसंख्येशात्रवाणांमहीतले ८ वारिणाचसुशीतेनशिरस्तस्याभ्यषेचयत् अस्फुटं
मुकुटंराज्ञः पुंडरीकसुगंधिना ९ ततःप्रत्यागतप्राणस्तद्दत्तंबलवान्नृपः सर्वंविसर्जयामासतमेकंसचिवंविना १० ततस्तस्याज्ञयाराज्ञो
विश्रान्तस्थितमहद्बलं सतुराजागिरिप्रस्थेतस्मिन्पुनरुपाविशत् ११ ततस्तस्मिन्गिरिवरेशुचिर्भूत्वाकृताञ्जलिः आराधयिषुःसर्वेशंतस्थावु
र्ध्वमुखःस्थितो १२ जगाममनसाचैववसिष्ठमृषिसत्तमं पुरोहितममित्रघ्नंतदासंवरणोनृपः १३ नक्तंदिनमथैकत्रस्थितेतस्मिन्नराधिपे
अथाजगामविप्रर्षिस्तदाद्वादशमे ऽहनि १४ रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरा॥ ७॥
व२

सुकृत् विशीर्णासघः शुष्कमन्दिग्धस्यः पाठांतरेसप्तोयः ९ बलंसैन्यं १० गिरिप्रस्थेशैलशिखरे ११ १२ १३ द्वादशमेद्वादशसंख्यापमिते १४

राम
२८३

दिव्येनविधिनायोगवलेन १५ ६ पश्यतःसतःपश्यतोयेवा १७ १८ २२ विहंगमहेखेचर २३ २४ किमन्यत्श्रेष्ठंअपवर्जेनात् [illegible] सानात् २५ २६ ॥ ॥ ॥ ६६६६

ति १ मु ४ भास्करं २

सविदित्वेवनृपतिंतपत्याहृतमानसं दिव्येनविधिनाज्ञात्वाभावितात्मामहानृषिः १५ तथातुनियतात्मातंतंनृपंमुनिसत्तमः आबभाषेसधर्मात्मातस्यै
वार्थचिकीर्षया १६ सतस्यमनुजेंद्रस्यपश्यतोभगवानृषिः ऊर्ध्वमाचक्रमेद्रष्टुंभास्करंद्युतिः १७ सहस्रांशुंततोविप्रःकृतांजलिरुपस्थितः वसि
ष्ठोहमितिप्रीत्यासचात्मानंन्यवेदयत् १८ तमुवाचमहातेजाविवस्वान्मुनिसत्तमं महर्षेस्वागतंतेस्तुकथयस्वयथेप्सितं १९ यदिच्छसिमहाभागम
त्तःप्रवदतांवर तत्तेदद्यामभिप्रेतंयद्यपिस्यात्सुदुष्करं २० एवमुक्तःसतेनर्षिर्वसिष्ठःप्रत्यभाषत प्रणिपत्यविवस्वंतंभानुमंतंमहातपाः २१ वसि
ष्ठ उ च येषातेतपतीनामसावित्र्यवरजासुता तांत्वांसंवरणस्यार्थेवरयामिविभावसो २२ सहिराजाबृहत्कीर्तिर्धर्मार्थविदुदारधीः युक्तःसंवरणो
भर्तादुहितुस्तेविहंगम २३ इत्युक्तःसतदातेनददानीत्येवनिश्चितः प्रत्यभाषततंविप्रंप्रतिनंद्यदिवाकरः २४ वरःसंवरणोराज्ञांत्वमृषीणांवरोमु
ने तपतीयोषितांश्रेष्ठाकिमन्यत्रापवर्जनात् २५ ततःसर्वानवद्यांगींतपतींतपनःस्वयं ददौसंवरणस्यार्थेवसिष्ठायमहात्मने २६ ॥ ॥

६६६६६६६६६६६६६६६६६६६६६६६६६६६६६६

श्री·
२९५

२७ २८ ३० कृछ्रात्क्लेशात्। द्वादशरात्रसाध्येसमाहितेसमाधौनिपमेसमाप्तेसति ३१ गोपतिंसूर्यं ३२ ३४ ३७ नववर्षराज्ञःकमासहस्रावार्षिकज्योतिष्टोमादि

प्रतिज्ञयाद्ततांकन्यांमहर्षिस्तपतींतदा वसिष्ठोथविसृष्टस्तुपुनरेवाजगामह २७ पञ्चविख्यातकीर्त्तिःसकुरुणामृषभोभवत् सराजामन्मथाविष्टस्तद्गतेनांतरात्मना २८ दृष्ट्वाचदेवकन्यांतांतपतींचारुहासिनीं वसिष्ठेनसहायांतांसंहृष्टोभ्यधिकंबभौ २९ रुरुचेसाधिकंसुभ्रूरापतंतीनभस्तलात् सौदामिनीवविभ्रष्टाद्योतयंतीदिशस्त्विषा ३० कृछ्राद्द्वादशरात्रेतुतस्याराज्ञःसमाहिते आजगामविशुद्धात्मावसिष्ठोभगवानृषिः ३१ तपसाराध्यवरदंदेवंगोपतिमीश्वरं लेभेसंवरणोभार्यांवसिष्ठस्यैवतेजसा ३२ ततस्तस्मिन्गिरिश्रेष्ठेदेवगंधर्वसेविते जगाहविधिवत्पाणिंतपत्याःसनरर्षभः ३३ वसिष्ठेनाभ्यनुज्ञातस्तस्मिन्नेवधराधरे सोकामयतराजर्षिर्विहर्तुंसहभार्यया ३४ ततःपुरेवरोद्यानेवनेषूपवनेषुच आदिदेशमहीपालस्तमेवसचिवंतदा ३५ नृपतिंत्वभ्यनुज्ञाप्यवसिष्ठोथापचक्रमे सोपिराजागिरौतस्मिन्विजहारामरोपमा ३६ ततोद्वादशवर्षेषुकाननेषुवनेषुच रेमेतस्मिन्गिरौराजातथैवसहभार्यया ३७ तस्यराज्ञःपुरेतस्मिन्समाद्वादशसत्तम नववर्षसहस्राक्षोराष्ट्रेचैवासभारत ३८ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ॥ राम

क्रियालोपात् ३८ रामरा ५ ५ ५ रामराम ५ ५ ५ ५ रामरामराम ५ ५ ५ ५ ७ ॥ ७॥ श्रीग ७ ७ ७ ५ ५ ५ ५ ५ ५ ५ ५ २९५

६९ अवश्यायःसोऽहारोपिनपपातकुतोऽन्नहशिरित्यर्थः ४० ४५ ततस्तायावभक्तैःमृतसदृशैः ४३ ५० इतिश्रीनैलकंठीयेभारतभावदीपेआदिपर्वणितापत्यार्थप्र-

शं ४

ततस्तस्यामनावृष्ट्यांप्रवृत्तायामरिंदम प्रजाः क्षयमुपाजग्मुःसर्वाःसस्थाणुजंगमाः ३९ तस्मिंस्तथाविधेकालेवर्तमानेसुदारुणे नावश्यायः
पपातोर्व्यांततः सस्यानिनारुहन् ४० ततोविभ्रांतमनसोजनाः क्षुद्भयपीडिताः गृहाणिसंपरित्यज्यबभ्रमुःप्रदिशोदिशः ४१ ततस्त
स्मिन्पुरेराष्ट्रेत्यक्तदारपरिग्रहाः परस्परममर्यादाः क्षुधार्ताजघ्निरेजनाः ४२ तत्क्षुधार्तैर्निराहारैः शवभूतैस्तथानरैः अभवत्प्रेतराजस्यपु
रंप्रेतैरिवावृतं ४३ ततस्तत्तादृशंदृष्ट्वासएवभगवानृषिः अभ्यवर्षतधर्मात्मावसिष्ठोमुनिसत्तमः ४४ तंचपार्थिवशार्दूलमानयामासतत्पुरं
तपत्यासहितंराजन्नुषितंशाश्वतीःसमाः ४५ ततःप्रवृष्टस्तत्रासीद्यथापूर्वंसुरारिहा तस्मिन्नृपतिशार्दूलेप्रविष्टेनगरंपुनः ४६ प्रववर्ष
सहस्राक्षःसस्यानिजनयन्प्रभुः ततःसराष्ट्रंमुमुदेतत्पुरंपरयामुदा तेनपार्थिवमुख्येनभावितंभावितात्मना ४७ ततोद्वादशवर्षाणिपुनरीजेन
राधिपः तपत्यासहितःपत्न्यायथाशच्यामरुत्पतिः ४८ गंधर्वउवाच एवमासीन्महाभागातपतीनामपौर्विकी तववैवस्वतीपार्थतापत्यस्त्वं
ययामतः ४९ तस्यांसंजनयामासकुरुंसंवरणोनृपः तपत्यांतपतांश्रेष्ठतापत्यस्त्वंययामतः ५० इत्यादिपर्वणितापत्यंसमाप्तं ॥ ॥

काशः ॥ ॥ ॥ ॥ छ ॥ छ ॥ रा छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ

श्री॰ २६५

सगं॰ १ २ ३ ४ ५ अपराधेनपुत्रशतवधरूपेण ६ ७ ८ ९ १० ११ १२ ॥ १२ १२ १२ १२ १२ १२ १२ १२

हितः ३

वैशंपायनउवाच सगांधर्ववचःश्रुत्वाततसभरतर्षभ अर्जुनःपरयाभक्त्यापूर्णचंद्रइवाबभौ १ उवाचचमहेष्वासोगंधर्वंकुरुसत्तमः
जातकौतूहलोतीववसिष्ठस्यतपोबलात् २ वसिष्ठइतिचैतस्यतदृषेर्नामकीर्तितं एतदिच्छाम्यहंश्रोतुंयथावत्तद्वदस्वमे ३ यएषगं
धर्वपतेपूर्वेषांनःपुरो॰ आसीदेतन्ममाचक्ष्वकएषभगवानृषिः ४ गंधर्वउवाच ब्रह्मणोमानसःपुत्रोवसिष्ठोरुंधतीपतिः तप
सानिर्जितौशश्वदजेयावमरैरपि ५ कामक्रोधावुभौयस्यचरणौसंववाहतुः यस्तुनोछेदनंचक्रेकुशिकानामुदारधीः विश्वा
मित्रापराधेनधारयन्मन्युमुत्तमं ६ पुत्रव्यसन[illegible]संतप्तःशक्तिमानप्यशक्तवत् विश्वामित्रविनाशायनचक्रेकर्मदारुणं ७
मृतांश्चपुनराहर्तुंशक्तःपुत्रान्यमक्षयात् कृतांतंनातिचक्रामवेलामिवमहोदधिः ८ यंप्राप्यविजितात्मानंमहात्मानंनराधिपाः
ऐक्ष्वाकवोमहीपालालेभिरेपृथिवीमिमां ९ पुरोहितमिमंप्राप्यवसिष्ठमृषिसत्तमं ईजिरेक्रतुभिश्चैवनृपास्तेकुरुनंदन १०
सहितान्याजयामाससर्वान्नृपतिसत्तमान् ब्रह्मर्षिःपांडवश्रेष्ठबृहस्पतिरिवामरान् ११ तस्माद्धर्मप्रधानात्मावेदधर्मविदीप्सि
तः ब्राह्मणोगुणवान्कश्चित्पुरोधाःप्रतिदृश्यतां १२

राम २६५

१३ १४ प्रकरणार्थमुपसंहरन्नितस्मादिति ११ अध्यायः किंनिमित्तं १४ मरुधन्वसु मरुसंज्ञकेष्वल्पजलप्रदेशेषु धन्वानु मरुदेशेनाक्लीबे चापे स्थले पिवेति मेदिनी १

क्षत्रियेणाभिजातेन पृथिवींजेतुमिच्छता पूर्वंपुरोहितः कार्यः पार्थराज्याभिवृद्धये १३ महींजिगीषताराज्ञाब्रह्मकार्यंपुरःसरं तस्मात्पुरोहितः
कश्चिद्गुणवान्विजितेंद्रियः विद्वान्भवतुवोविप्रोधर्मकामार्थतत्ववित् १५ इत्यादिपर्वणि अर्जुनउवाच किंनिमित्तमभूद्वैरंविश्वामित्रवसिष्ठ
योः वसतोराश्रमेदिव्येशंसनःसर्वमेवतत् १ गंधर्वउवाच इदंवासिष्ठमाख्यानंपुराणंपरिचक्षते पार्थसर्वेषुलोकेषुयथावत्तन्निबोधमे २
कान्यकुब्जेमहानासीत्पार्थिवोभरतर्षभ गाधीतिविश्रुतोलोकेकुशिकस्यात्मसंभवः ३ तस्यधर्मात्मनःपुत्रःसमृद्धबलवाहनः विश्वामित्रइ
तिख्यातोवभूवरिपुमर्दनः ४ सचचारसहामात्योमृगयांगहनेवने मृगान्विध्यन्वराहांश्चरम्येषुमरुधन्वसु ५ व्यायामकर्षितःसोथम
गलिप्सुःपिपासितः आजगामनरश्रेष्ठवसिष्ठस्याश्रमंप्रति ६ तमागतमभिप्रेक्ष्यवसिष्ठःश्रेष्ठभागृषिः विश्वामित्रंनरश्रेष्ठंप्रतिज
ग्राहपूजया ७ पाद्यार्घाचमनीयेनस्वागतेनचभारत तथैवपरिजग्राहवन्येनहविषातथा ८ तस्याथकामधुग्धेनुर्वसिष्ठस्यमहात्म
नः उक्ताकामान्प्रयच्छेतिसाकामानदुहत्सदा ९

व्यायामकर्षितःश्रमेणाम्लानः ६ श्रेष्ठभाक्श्रेष्ठपूजकः ७ परिजग्राहनिमंत्रितवान् ८ ९ ९ ९ ९ ९ ९ ९ ९ ९ ९ ९ ९

आ॰
२९६

ग्राम्याव्रीह्यादयः आरण्याः नीवारादयः षड्रसाः मधुरादयः रसायनं शिथिलदेहतापारकं १० पेयानि क्षीरादीनि भक्ष्याणि रत्नैरखंडुनीयाम अपूपादीनि लेह्यानि पायसादीनि चोष्याणि इक्षुकांडादीनि ११ सबलः ससैन्यः १२ षडुन्नतामिति शिरोग्रीवासक्थि छस्याः स्तापुच्छ मथस्तनाः शुभान्येतानि धेनूनामायतानि

ग्राम्यारण्याश्चौषधीश्च दुदुहे पय एव च षड्रसं चामृतनिभं रसायनमनुत्तमं १० भोजनीयानि पेयानि भक्ष्याणि विविधानि च लेह्यान्यमृतकल्पानि चोष्याणि च तथार्जुन ११ रत्नानि च महार्हाणि वासांसि विविधानि च तैः कामैः सर्वसंपूर्णैः पूजितश्च महीपतिः सामात्यः सबलश्चैव तुतोष स भृशं तदा १२ षडुन्नतां सुपार्श्वोरुं पृथुपंचसमावृतां मंडूकनेत्रां स्वाकारां पीनोधसमनिंदितां १३ सुवालधिं शंकुकर्णीं चारुशृंगां मनोरमां पुष्टायतशिरोग्रीवां विस्मितः सोभिवीक्ष्य तां १४ अभिनंदति तां राजा नंदिनीं गाधिनंदनः अब्रवीच्च भृशं तुष्टः स राजा तमृषिं तदा १५ अर्बुदेन गवां ब्रह्मन्मम राज्येन वा पुनः नंदिनीं संप्रयच्छस्व भुंक्ष्व राज्यं महामुने १६ वसिष्ठ उवाच देवतातिथिपित्रर्थं याज्यार्थं च पयस्विनी अदेया नंदिनीयं वै राज्येनापि तवानघ १७ १७ १७ १७ १७ १७ १

राम

प्रवक्ष्यते षडुन्नतां षडुपन्नतां तथा पृथुभिः पंचभिरंगैः समावृतां पुच्छं ललाटं श्रवणौ वै वपन्नद्धितयं तथा पृथून्येतानि यस्यास्तं पीनतां पंच स्मृतिभिः मंडूकस्येव उद्धृते नेत्रे यस्याः पीनं दुग्धः क्षीरपोषेण यस्याः सा पीनोधसं १३ सुवालाधिं शोभनपुच्छां शंकुरिव तीक्ष्णौ कर्णौ यस्याः सा १४ नंदिनीनामतः १५ १६ १७
२९६

१८ २१ कशादंडप्रतुदितांकशाघातेनखेदंप्रापितां काल्यमानांइतस्ततोनिरोधमानां २२ २३ २४ २५ २६ २७ २८

विश्वामित्रउच क्षत्रियोहंभवान्विप्रस्तपःस्वाध्यायसाधनः ब्राह्मणेषुकुतोवीर्यंप्रशांतेषुधृतात्मसु १८ अर्बुदेनगवांयस्त्वंनददासिममे
प्सितां स्वधर्मंनप्रहास्यामिनेष्यामिचबलेनगां १९ वसिष्ठउच बलस्थश्चासिराजाचबाहुवीर्यश्चक्षत्रियः यथेच्छसितथाक्षिप्रंकु
रुमात्वंविचारय २० गंधर्वउच एवमुक्तस्तथापार्थविश्वामित्रोबलादिव हंसचंद्रप्रतीकाशांनंदिनींतांजहारगां २१ कशादंडप्र २७
तुदितांकाल्यमानामितस्ततः हंभायमानाकल्याणीवसिष्ठस्याथनंदिनी २२ आगम्याभिमुखीपार्थतस्थौभगवदुन्मुखी भृशंचता
ड्यमानापिनजगामाश्रमात्ततः २३ वसिष्ठउच शृणोमितेरवंभद्रेविनदंत्याःपुनःपुनः ह्रियसेत्वंबलान्नंदिविश्वामित्रेणनंदिनी किंक
र्तव्यंमयातत्रक्षमावान्ब्राह्मणोह्यहं २४ गंधर्वउच साभयादुद्विग्नानंदिनीतेषांबलानांभरतर्षभ विश्वामित्रभयोद्विग्नावसिष्ठंसमुपागम
त् २५ गौरुच कशाग्रदंडाभिहतांक्रोशंतींमामनाथवत् विश्वामित्रबलैर्घोरैर्भगवन्किमुपेक्षसे २६ गंधर्वउच नंदिन्यामेवंक्रंदं
त्यांधर्षितायांमहामुनिः नचुक्षुभेतथाधैर्यान्नचचालधृतव्रतः २७ वसिष्ठउच क्षत्रियाणांबलंतेजोब्राह्मणानांक्षमाबलं क्षमामांभ
जतेयस्माद्गम्यतांयदिरोचते २८

आ॰ २९ ३० ३१ ३२ ३३ ३४ पन्हवाद्यो म्लेच्छविशेषाः मह्यावात कुक्षः मदेशात् शकृतः गोमयात् ३५ ३६ ३७ ५० ५० ५० ५०

२८७ नंदिन्युच किंनुत्यक्तास्मिभगवन्मदेवंत्वंप्रभाषसे अत्यक्ताहंत्वयाब्रह्मनेनंतुशक्यानवैबलात् २९ वसिष्ठउवाच नत्वांत्यजामिकल्याणिस्थी
यतांयदिशक्यते हृतेमहात्मावध्येषबलात्तेक्षीपतेबलात् ३० गंधर्वेउच स्थीयतामितितच्छ्रुत्वावसिष्ठस्यपयस्विनी ऊर्ध्वांचितशिरोग्री
वाभववभौरौद्रदर्शना ३१ क्रोधरक्तेक्षणासागोर्हंभारवघनस्वना विश्वामित्रस्यतत्सैन्यंव्यद्रावयतसर्वशः ३२ कशाग्रदंडाभिहताकाल्य
मानाततस्ततः क्रोधरक्तेक्षणाक्रोधंभूयएवसमादधे ३३ आदित्यइवमध्याह्ने क्रोधदीप्तवपुर्बभौ अंगारवर्षंमुंचंतीमुहुर्वालधितोमह
त् ३४ असृजत्पह्लवान्पुच्छात्प्रस्रावाद्द्राविडाञ्छकान् योनिदेशाच्चयवनान्शकृतः शबरान्बहून् ३५ मूत्रतश्चासृजत्कांचीछबरां
श्चैवपार्श्वतः पौंड्रान्किरातान्यवनान्सिंहलान्बर्बरान्खसान् ३६ निवुकांश्चपुलिंदांश्चवीणान्हूणान्सकेरलान् ससर्जफेनतः
सागोम्लेच्छान्बहुविधानपि ३७ तैर्विसृष्टैर्महासैन्यैर्नानाम्लेच्छगणैस्तदा नानावरणसंछन्नैर्नानायुधधरैस्तथा ३८ अवाकी
र्यतसंरब्धैर्विश्वामित्रस्यपश्यतः एकैकस्यतदायोधः पंचभिः सप्तभिर्वृतः ३९ अस्त्रवर्षेणमहताबध्यमानंबलंतदा प्रभग्नं राम
सर्वतस्त्रस्तंविश्वमित्रस्यपश्यतः ५० ॥ श्रीगणा॥ ॥

५॰ ५॰ ५॰ २८८

४१ ४३ ४५ विहृत्यमप्राप्य ४६ ४७ अध्यायः कल्माष असदृशः नास्तिसदृशस्तुल्योयस्यसः १ २ ३ पाप्मायोनिअपंममपाप्मोभवतित्येतदर्थः ४ एकायनगतः

नचमार्गैर्विपुल्यन्तेकेचित्तत्रास्यसैनिकाः विश्वामित्रस्यसंक्रुद्धेवसिष्ठेभरतर्षभ ४१ सोगोत्सत्यकलंसैन्यंकालयामासदूरतः विश्वामि
त्रस्यतत्सैन्यंकाल्यमानंत्रियोजनं ४२ क्रोशमानंभयोद्विग्नंत्रातारंनाभ्यगच्छत दृष्ट्वातन्महदाश्चर्यंब्रह्मतेजोभवंतदा ४३ विश्वामित्रः क्ष
त्रभावान्निर्विण्णोवाक्यमब्रवीत् धिग्बलंक्षत्रियबलंब्रह्मतेजोबलंबलं ४४ बलाबलंविनिश्चित्यतपएवपरंबलं सराज्यंस्फीतमुत्सृज्यतांचदी
प्तांनृपश्रियं ४५ भोगांश्चपृष्ठतःकृत्वातपस्येवमनोदधे सगत्वातपसासिद्धिंलोकोविष्टभ्यतेजसा ततापसर्वान्दीप्तौजाब्राह्मणत्वमवाप्त
वान् अपिबच्चततःसोममिंद्रेणसहकौशिकः ४७ इत्यादिपर्वणिवासिष्ठे गंधर्वउवाच कल्माषपादइत्येवंलोकेराजाबभूवह इक्ष्वाकुवंश
जःपार्थतेजसासदृशोभुवि १ सकदाचिद्वनंराजामृगयांनिर्ययौपुरात मृगान्विध्यन्वराहांश्चचचाररिपुमर्दनः २ तस्मिन्वनेमहाघोरेखड्गा
श्चबहुशोहनत् हत्वाचसुचिरंश्रांतोराजानिववृतेततः ३ अकामयत्तंयाज्यार्थेविश्वामित्रःप्रतापवान् सतुराजामहात्मानंवासिष्ठमृषि
सत्तमं ४ तृषार्तश्चक्षुधार्तश्चएकायनगतःपथि अपश्यदजितःसंख्येमुनिंप्रतिमुखागतं ५ ॥ ॥ ॥ ॥ ॥

एकस्यैवअयनंगमनंयत्रतत्रगतःप्रतिसंकुचितेमार्गइत्यर्थः ५

आ० ६ पथोमार्गात् ७ धर्मः सनातनः राज्ञः पंथा ब्राह्मणेनासमेमत्तु ब्राह्मणस्यैव पंथा स्मादिशास्त्रविहितः ८ ९ मानात्क्रोधाच्च मुनेर्मार्गान्नापचक्रामा अथ हग

२९८ शक्तिं नाम महाभागं वसिष्ठकुलवर्द्धनं ज्येष्ठं पुत्रं पुत्रशताद्वशिष्ठस्य महात्मनः ६ अपगच्छ पथोस्माकमित्येवं पार्थिवोब्रवीत् तथा ऋषिरुवाचैनं सां
त्वयञ्श्लक्ष्णया गिरा ७ मम पंथा महाराज धर्म एष सनातनः राज्ञा सर्वेषु धर्मेषु देयः पंथा द्विजातये ८ एवं परस्परं तौ तु पथोर्थं वाक्यमूचतुः
अपसर्पापसर्पेति वागुत्तरमकुर्वतां ९ ऋषिस्तु नापचक्राम तस्मिन्धर्मपथे स्थितः नापि राजा मुनेर्मानात्क्रोधाच्चापि जगाम ह १० अमु
ञ्चंतं पथानं तमृषिं नृपसत्तमः जघान कशया मोहात्तदा राक्षसवन्मुनिं ११ कशाभिहाराभिहतस्ततः स मुनिसत्तमः तं शशाप नृपश्रेष्ठं वा
सिष्ठः क्रोधमूर्छितः १२ हंसि राक्षसवद्यस्माद्राजापसद तापसं तस्मात्त्वमद्यप्रभृति पुरुषादो भविष्यसि १३ मनुष्यपिशिते सक्तश्चरि
ष्यसि महीमिमां गच्छ राजाधमेत्युक्तः शक्तिना वीर्यशक्तिना १४ ततो याज्यनिमित्तं तु विश्वामित्रवसिष्ठयोः वैरमासीत्तदा तं तु विश्वामि
त्रोन्वपद्यत १५ तयोर्विवदतोरेवं समीपमुपचक्रमे ऋषिरुग्रतपाः पार्थ विश्वामित्रः प्रतापवान् १६ श्री राम राम राम राम राम

त्रिशापानंतरं १० १४ तत इति एवं विश्वामित्रः स्वविद्याबलात् शक्तिनृपयोर्वैरमुत्पाद्य तेन नृपं याज्यं पर्शाविश्वामित्रोन्वपद्यत तदा तयोर्वैरमासीदित्यर्थः १५ तयो राम
शक्तिनृपयोः विवदतोः ऋषिः राजर्षिः १६ ॥ ॥ श्री रा रा ७

२९८

पश्चाद्विश्वामित्रागमनानंतरं। ऋषिं शक्तिं १७ ततोत्मानंतत आत्मानं उभौ शक्तिराजानौ अतिचक्राम संचिंतितवान १८ १९ तस्याः एतो भावं शक्तिप्रसादनपरं ज्ञात्वा तरेंत

ततः स बुबुधे पश्चात्तमृषिं नृपसत्तमः ऋषेः पुत्रं वसिष्ठस्य वसिष्ठमिव तेजसा १७ अंतर्धाय ततो [illegible]त्मानं विश्वामित्रोपि भारत तावुभावतिचक्रा
म चिकीर्षन्नात्मनः प्रियं १८ स तु शप्तस्तदा तेन शक्तिना वै नृपोत्तमः जगाम शरणं शक्तिं प्रसादयितुमर्हयन् १९ तस्य भावं विदित्वा स नृप
तेः कुरुसत्तम विश्वामित्रस्ततो रक्षआदिदेश नृपं प्रति २० शापात्तस्य तु विप्रर्षेर्विश्वामित्रस्य चाज्ञया राक्षसः किंकरो नाम विवेश नृपतिं त
दा २१ रक्षसा तं गृहीतं तु विदित्वा मुनिसत्तमः विश्वामित्रोप्यपाक्रामत्तस्माद्देशादरिंदम २२ ततः स नृपतिस्तेन रक्षसांतर्गतेन वै बलव
त्पीडितः पार्थ नान्वबुध्यत किंचन २३ ददर्शाथ द्विजः कश्चिद्राजानं प्रस्थितं वनं अयाचत क्षुधापन्नः समांसं भोजनं तदा २४ तमुवा
चाथ राजर्षिर्द्विजं मित्रसहस्तदा आस्स्व ब्रह्मंस्त्वमत्रैव मुहूर्तं प्रतिपालयन् २५ निवृत्तः प्रतिदास्यामि भोजनं ते यथेप्सितं इत्युक्त्वा प्र
ययौ राजा तस्थौ स द्विजसत्तमः २६ ततो राजा परिक्रम्य यथाकामं यथासुखं निवृत्तोंतः पुरं पार्थ प्रविवेश महामनाः २७ ततोर्द्धरात्र उ
त्थाय सूदमानाय्य सत्वरं उवाच राजा संस्मृत्य ब्राह्मणस्य प्रतिश्रुतं २८

रेरक्षः प्रवेशितवान् २० २२ बलवत् अतंतं २३ २४ २५ २६ २७ २८ १८ १८ १८ १८ १८ ७

आ॰ २९ ३० ३१ ३२ ३३ ३४ अन्नंनरमांसेलोलुपाश्चासक्तिः ३५ ३६ ३७ ३८ ३९ ४० ४० ४० ४० ४० ४

२९९

गछामुष्मिन्वनोद्देशेब्राह्मणोमांसमनीरूते अत्तार्थितंतमन्नेनसमांसेनोपपादय २९ गंधर्वेउ च एवमुक्तस्ततःसूदःसोनासाधामिषंक्वचित्
निवेदयामासततस्तस्मैराज्ञेव्यथान्वितः ३० राजातुरक्षसाविष्टःसूदमाहगतव्यथः अप्येनंनरमांसेनभोजयेतिपुनःपुनः ३१ तथेत्युक्त्वात
तःसूदःसंस्थानंवध्यघातिनां मत्वाजहारत्वरितोनरमांसमपेतभीः ३२ सतत्संस्कृत्यविधिवदन्नोपहितमाशुवै तस्मैप्रादाद्ब्राह्मणायक्षुधि
तायतपस्विने ३३ ससिद्धचक्षुषादृष्ट्वातदन्नंद्विजसत्तमः अभोज्यमिदमित्याहक्रोधपर्याकुलेक्षणः ३४ ब्राह्मणउ च यस्माद्भोज्यमन्न
मेतद्ददातिसनराधमः तस्मात्तस्यैवमूढस्यभविष्यत्यत्रलोलुपा ३५ सक्तोमानुषमांसेषुयथोक्तःशक्तिनापुरा उद्वेजनीयोभूतानांचरिष्य
तिमहीमिमां ३६ द्विरनुव्याहृतेराज्ञःसशापोबलवानभूत् रक्षोबलसमाविष्टोविसंज्ञश्चाभवन्नृपः ३७ ततःसनृपतिःश्रेष्ठोरक्षसाप
हृतेन्द्रियः उवाचशक्तिंतंदृष्ट्वानचिरादिवभारत ३८ यस्मादसदृशःशापःप्रयुक्तोयंमयित्वया तस्मात्त्वत्तःप्रवर्तिष्येखादितुंपुरुषानहं
३९ एवमुक्त्वाततःसद्यस्तंप्राणैर्विप्रयुज्यच शक्तिनंभक्षयामासव्याघ्रःपशुमिवेप्सितं ४० ॥

राम

रामरामराम ॥

२९९

उमोचपातयामासस्वात्मानंदेहं १

४१ ४२ कौशिकंहत्रिमोविमोक्षे स्वार्थंशतंमुनीन् जातिवियोगसिछ्नस्तुखरितोपिरूमापरः ४६ अथाप्य ततोदृष्टा १ २ ३ ३ ३ ३

शक्तिर्गणंतुमृतंदृष्ट्वाविश्वामित्रः पुनःपुनः वसिष्ठस्यैवपुत्रेषुतद्रक्षःसंदिदेशह ४१ सतांछन्नावरासुत्वान्वसिष्ठस्यमहात्मनः भक्षयामाससं
क्रुद्धः सिंहः क्षुद्रमृगानिव ४२ वसिष्ठोघातितान्श्रुत्वाविश्वामित्रेणतान्सुतान् धारयामासतंशोकंमहाद्रिरिवमेदिनीं चक्रेचात्मविनाशायबु
द्धिंसमुनिसत्तमः नत्वेवकौशिकोच्छेदंमेनेमतिमतांवरः ४४ समेरुकूटादात्मानंमुमोचभगवानृषिः गिरेस्तस्यशिलायांतुतूलराशाविवापतत्
४५ नममारचपातेनसयदातेनपांडव तदाग्निमिद्धंभगवान्संविवेशमहावने ४६ तंतदासुसमिद्धोपिनददाहहुताशनः दीप्यमानो
प्यमित्रघ्नशीतोग्निरभवत्ततः ४७ ससमुद्रमभिप्रेक्ष्यशोकाविष्टोमहामुनिः बध्वाकंठेशिलांगुर्वींनिपपाततदंभसि ४८ ससमुद्रोर्मिवेगेन
स्थलेन्यस्तोमहामुनिः जगामसततः खिन्नःपुनरेवाश्रमंप्रति ४९ इत्यादिपर्वणिवासिष्ठे गंधर्वउव ततोदृष्ट्वाश्रमपदंरहितंतैः
सुतैर्मुनिः निर्जगामसुदुःखार्तःपुनरप्याश्रमात्ततः १ सोपश्यत्सरितंपूर्णांप्रावृट्कालेनवांभसा वृक्षान्बहुविधान्पार्थहरंतींतीरजा
न्बहून् २ अथचिंतांसमापेदेपुनःकौरवनंदन अंभस्यस्यानिमज्जेयमितिदुःखसमन्वितः ३ ३ ३ ३ ६३ ६३

७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

आ०

३००

४ ५ ६ ७ ८ ९ १० वधास्नुषया ११ १२ १३

म १

ततःपाशैस्तदात्मानंगाढंबध्वामहामुनिः तस्याजलेमहानद्यानिमज्जत्सुदुःखितः ४ अथछित्वानदीपाशांस्तस्यारिवलसूदन स्थलस्थंतमृषिं
कृत्वाविपाशंसमवासृजत् ५ उत्ततारततःपाशैर्विमुक्तःसमहानृषिः विपाशेतिचनामास्यानद्याश्चक्रेमहानृषिः ६ शोकबुद्धिंततश्चक्रेन
चैकत्रव्यतिष्ठत सोगच्छत्पर्वतांश्चैवसरितश्चसरांसिच ७ दृष्ट्वासपुनरेवर्षिर्नदींहैमवतींतदा चंडग्राहवतींभीमांतस्याःस्रोतस्यपातयत्
८ सातमग्निसमंविप्रमनुचिंत्यसरिद्वरा शतधाविद्रुतायस्माच्छतद्रुरितिविश्रुता ९ ततःस्थलगतंदृष्ट्वातत्राप्यात्मानमात्मना मर्तुंन
शक्यामीत्युक्त्वापुनरेवाश्रमंययौ १० सगत्वाविविधांशैलान्देशान्बहुविधांस्तथा अदृश्यंत्याख्ययावध्वाश्रमेनुसृतोभवत् अथशुश्रा
वसंगत्यावेदाध्ययननिस्वनं पृष्ठतःपरिपूर्णार्थैःषड्भिरंगैरलंकृतं ११ अनुव्रजतिकोन्वेषमामित्येवाथसोब्रवीत् अहमित्यदृश्यंतीमं
सास्नुषाप्रत्यभाषत शक्तेर्भार्यामहाभागतपोयुक्तातपस्विना १२ वसिष्ठ च पुत्रिकस्यैष [redacted] संगस्याध्ययनस्वनः पुरासा
गस्यवेदस्यशक्तेरिवमयाश्रुतः १३

स्पवेद १

ग्राम०

३००

१४ १५ १६ १७ १८ १९ २० २१ माभैः माभैषीः गातिस्थेतिसत्रैभ्यपरीतविमतेरपिग्रहणप्रकृसिचोलुक् २२ २३ २४ तस्माद्योगात् योगजसामर्थ्यात्

अदृश्यंत्युवाच अयंकुक्षौसमुत्पन्नः शक्तेर्गर्भः सुतस्यते समाद्वादशतस्येहवेदानभ्यस्यतोमुने १४ गंधर्वउवाच एवमुक्तस्तयाहृष्टोवसिष्ठःश्रे
ष्ठभाग्मुनिः अस्तिसंतानमित्युक्त्वामृत्योःपार्थन्यवर्तत १५ ततः प्रतिनिवृत्तःसतयावध्वासहानघ कल्माषपादमासीनंददर्शविजनेवने १६
सतुदृष्ट्वैवतंराजाक्रुद्धउत्थायभारत आविष्टोरक्षसोग्रेणइयेषात्तुंततामुनिं १७ अदृश्यंतीतुतंदृष्ट्वाक्रूरकर्माणमग्रतः भयसंविग्नयावाचावसिष्ठ
मिदमब्रवीत् १८ असौमृत्युरिवोग्रेणदंडेनभगवन्नितः प्रगृहीतेनकाष्ठेनराक्षसोभ्येतिदारुणः १९ तंनिवारयितुंशक्तोनान्योस्तिभुविकश्चन
त्वदृतेद्यमहाभागसर्ववेदविदांवर २० पाहिमांभगवन्पापादस्माद्दारुणदर्शनात् रक्षसापिमहाश्रुवैन नमांवांसमीहते २१ वसिष्ठउ च माभै
:पुत्रनभेतव्यंराक्षसात्तुकथंचन नैतद्रक्षोभयंयस्मात्पश्यसित्वमुपस्थितं २२ राजाकल्माषपादोऽयंवीर्यवान्प्रथितोभुवि सएषोस्मिन्वनोद्देशे
निवसत्यतिभीषणः २३ गंधर्वउ च तमापतंतंसंप्रेक्ष्यवसिष्ठोभगवानृषिः वारयामासतेजस्वीहुंकारेणैवभारत २४ मंत्रपूतेनचपुनःस
तमभ्युक्ष्यवारिणा मोक्षयामासवैशापात्तस्माद्योगान्नराधिपं २५

२५ २५ २५ २५ २५ २५ २५ २५ २५ २५ २५ २५ २५

श्रा॰
३०१

मागेवैनत्कुतोनकृतमित्यत आह सहीति वसिष्ठस्य शक्तिरूपस्य २६ २७ २८ वृत्तंनिष्पन्नंएतत्तत्वयाकर्तव्यं अस्मादिदंविरुद्धकरणापापमुक्तिः। तपेवरस्त्रैभिर्भूतेनमम

घ२

सहिद्वादशवर्षाणिवसिष्ठस्यैवतेजसा ग्रस्तआसीद्गृहेणेवपर्वकालेदिवाकरः २६ रक्षसाविप्रमुक्तोथसनृपस्तद्वनंमहत् तेजसारंजयामाससंध्याभ्र
मिवभास्करः २७ प्रतिलभ्यततःसंज्ञामभिप्रकृतांजलिः उवाचनृपतिःकालेवसिष्ठमृषिसत्तमं २८ सौदासोहंमहाभागयाज्यस्तेमुनिसत्त
म अस्मिन्कालेपरिहितंतेब्रूहिकिंकरवाणिते २९ वसिष्ठउवाच वृत्तमेतद्यथाकालंगच्छराज्यंप्रशाधिवैब्राह्मणांस्तुमनुष्येंद्रमावमंस्थाःकदाचन ३०
राजोवाच नावमंस्येमहाभागकदाचिद्ब्राह्मणर्षभान् त्वन्निर्देशेस्थितःसम्यक्पूजयिष्याम्यहंद्विजान् ३१ इक्ष्वाकूणांचयेनाहमनृणःस्यांद्विजोत्तमे
तत्तस्तुप्राप्तुमिच्छामिसर्वंवेदविदांवर ३२ अपत्यमीप्सितंमह्यंदातुमर्हसिसत्तम शीलरूपगुणोपेतमिक्ष्वाकुकुलवृद्धये ३३ गंधर्वउवाच दत्ता
मीत्येवतंसत्तमराजानंप्रत्युवाचह वसिष्ठःपरमेष्वासंसत्यसंधोद्विजोत्तमः ३४ ततःप्रतिययौकालेवसिष्ठःसहतेनवै ख्यातांपुरीमिमांलोकेत्वयो
ध्यांमनुजेश्वर ३५ तंप्रजाःप्रतिमोदंत्यःसर्वाःप्रत्युद्गतास्तदा विपाप्मानंमहात्मानंदिवौकसइवेश्वरं ३६ सुचिरात्मनुष्येंद्रोनगरींपुण्यलक्ष
णां विवेशसहितस्तेनवसिष्ठेनमहर्षिणा ३७ ॥ ॥

राम

पुत्रशतंभक्तितमितिभावः ३० ३१ ३१ ३१ ३१ ३१ ३१ ३१ ३१

३०१

३८ ३९ पंथानमित्यर्थः पुरुत्वं ४० ४१ ४२ संविदंधेकमत्वा संवभवमिथुनीवभव रिप्यनस्वर्गंसा अलोलेनेत्यर्थः ४३ ४४ ४५ पौरान्त्संपुरं चौरन्त्यमिति तु पठितं पुरुकं

वि२

रहस्युतं महीपालमयोध्यावासिनो जनाः पुरोहितेन सहितं दिवाकरमिवोदितं ३८ स च तां शरयामास लक्ष्माल स्त्रीवतां वरः अयोध्यायामशीतांशुः श
रत्कालरवोदितः ३९ सुसंक्लिष्टपथानं पताकाध्वजशोभितं मनःप्रह्लादयामास तस्य तत्पुरमुत्तमं ४० तुष्टपुष्टजनाकीर्णा सा पुरी कुरुनंदन अशोभत
तदा तेन शक्रेणेवामरावती ४१ ततः प्रविष्टे राजर्षौ तस्मिंस्तत्पुरमुत्तमं राजस्तस्यात पादेवी वसिष्ठमुपचक्रमे ४२ महर्षिः संविदं कृत्वा संवभवतपास
ह देव्या दिष्टेन विधिना वसिष्ठश्रेष्ठभागृषिः ४३ ततस्तस्याः समुत्पन्ने गर्भे स मुनिसत्तमः राज्ञाभिवादितस्तेन जगाम मुनिराश्रमं ४४ दीर्घकालेन सा गर्भं
सुषुवे न तु तं यदा देव्या स्मनाकुक्षिं निर्बिभेदश्मशालिनी ४५ ततो द्वादशवर्षे स जज्ञे पुरुषर्षभः अश्मको नाम राजर्षिः ...न्यपोन्यवेशपत ४६
इत्यादि पूर्वे शिवा वसिष्ठे गंधर्व उवाच आश्रमस्थात् ततः पुत्रमदृश्यंती व्यजायत शक्तेः कुलकरं राजन्द्वितीयमिव शक्तिणं १ जातकर्मादिकास्तस्य कि
याः स मुनिसत्तमः पौत्रस्य भरतश्रेष्ठ चकार भगवान्स्वयं २ परासुः स यतस्तेन वसिष्ठः स्थापितो मुनिः गर्भस्थेन ततो लोके पराशर इति स्मृतः ३ ३

श्लो ३

आदित्यविकारे वा चोरनं निशामनंतरं दैवोढ्रुनमिति भाषयामसिद्धं ४६ अध्यायः आश्रम १ परासुरिति परासोरा शंसनं अवस्थानं येन स पराशरः परा आङ् सर्वतः शासेड
रन्प्रत्ययः कल्पः २ ३

श्रा·

३०२

४ ५ ६ ७ ८ ९ मैत्रावरुणिर्मित्रावरुणयोः पुत्रः अंत्यधीः। अंतेसिद्धांतेसाध्वी अंत्याधीर्यस्यसोंत्यधीः १० ११ १२ १३ १४ १५ १५ १५ १५

ती

अमन्यतसधर्मात्मावसिष्ठंपितरंमुनिं जन्मप्रभृतितस्मिंस्तुपितरीवान्ववर्तत ४ सतातइतिविप्रर्षिवसिष्ठंप्रत्यभाषत मातुःसमक्षंकौंतेयअदृश्यंत्याः
परंतप ५ तातेतिपरिपूर्णार्थैतस्यतन्मधुरंवचः अदृश्यंत्यश्रुपूर्णाक्षी शृण्वतीतमुवाचह ६ मातातताततेतिनत्वंत्वंपितरंपितुः रक्षसाभक्षि
तस्तातत्वतातोवनांतरे ७ मन्यसेयंतुतातेतिनैषताततवानघ आर्यएषपितातस्यपितुस्तवयशस्विनः ८ सएवमुक्तोदुःखार्तःसत्यवागृषिसत्त
मः सर्वलोकविनाशायमतिंचक्रेमहामनाः ९ तंतथानिश्चितात्मानंसमहात्मामहातपाः ऋषिर्ब्रह्मविदांश्रेष्ठोमैत्रावरुणिरंत्यधीः १० वसिष्ठो
वारयामासहेतुनायेनतच्छृणु वसिष्ठस्तु च कृतवीर्यइतिख्यातोबभूवपृथिवीपतिः याज्योवेदविदांलोकेभृगूणांपार्थिवर्षभ ११ [illegible]
[illegible] सतानग्रभुजस्तातधान्येनचधनेनच सोमांतेतर्पयामासविपुलेनविशांपते १२ तस्मिन्नृपतिशार्दूलेस्वर्यातेथकस्यचित्‌ बभूव
तत्कुलेयानांद्रव्यकार्यमुपस्थितं १३ भृगूणांतुधनंज्ञात्वाराजानःसर्वएवते याचिष्णवोभिजग्मुस्तांस्ततोभार्गवसत्तमान्‌ १४ भूमौतुनिदधुः राम
केचिद्भृगवोधनमक्षयं ददुःकेचिद्द्विजातिभ्योज्ञात्वाक्षत्रियतोभयं १५ ॥

३०२

१६ १७

२६ २७ २१ तद्गर्भं तस्याः गर्भे उपलभ्य ब्राह्मणी या काचित् भयार्दिता ज्ञात्वापि गर्भस्य किमिति गोपनं कृतमिति हेतोर्भीता उपह्वरे समीप २२ दुद्रुवुस्तामनिंदितामि

भगवंस्तु दुःखे चित्रेणापि वित्तं प्रयोषितं क्षत्रियाणां तदा तात कारणांतरदर्शनात् १६ ततो महीतलं तात क्षत्रियेण परिच्छया खनताधिगतं वित्तं के
न चिद्भृगुवेश्मनि १७ तद्वित्तं ददृशुः सर्वे समेताः क्षत्रियर्षभाः अवमन्य ततः क्रोधाद्भृगूंस्तांश्छरणागतान् १८ निजघ्नुः परमेष्वासाः सर्वांस्तां
न्निशितैः शरैः आगर्भादवकृंतंतश्चेरुः सर्वां वसुंधरां १९ तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा भृगुपत्न्यो गिरिं दुर्गं हिमवंतं प्रपेदिरे २० ता
सामन्यतमा गर्भं भयाद्दध्रे महौजसं ऊरुणैकेन वामोरूर्भर्तुः कुलविवृद्धये २१ तद्गर्भमुपलभ्याशु ब्राह्मणी सात्र पार्दिता गत्वैका कथयामास
क्षत्रियाणामुपह्वरे २२ ततस्ते क्षत्रिया जग्मुस्तं गर्भं हंतुमुद्यताः ददृशुर्ब्राह्मणीं तेथ दीप्यमानां स्वतेजसा २३ अथ गर्भः स भित्वोरुं ब्राह्मण्या
निर्जगाम रमुषन्दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः २४ ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः ततस्ते मोहमापन्ना राजानो नष्टदृष्टयः
ब्राह्मणीं शरणं जग्मुर्दृष्ट्यर्थं तामनिंदितां २५ ऊचुश्चैनां महाभागां क्षत्रियास्ते विचेतसः ज्योतिःप्रहीणा दुःखार्त्ताः शांतार्चिष इवाग्नयः २६
भगवत्याः प्रसादेन गच्छेत्क्षत्रं सचक्षुषं उपारम्य च गच्छेम सहिताः पापकर्मिणः २७ ॥

तिपाग्हंतुमितिशेषः २३ २६ उपारम्य पापात्रिवृत्तिं कृत्वा पापकर्मिणोपि वयं २७ २७ २७ २७ २८ २८ २८ २८

२८ अध्यायः नाहंभीतातातः १ आत्मानि आत्मानि रक्षानेसहपं ३ ४ ५ तत्ता हे ताताः संबोधनार्थो निपातोवापं ६ ७ ऊरुतउत्पन्न और्वइतिनिरुक्तिमाह अनेने·

सपुत्रात्वं मसारंनः कर्त्तुमर्हसि शोभने पुनर्दृष्टिं प्रसादेन राज्ञःसंत्रातुमर्हसि २८ इत्यादिपर्वणि पौर्वे ब्राह्मणपु च नाहं गृह्णामि वस्तात दृष्टीनास्मि
रुषान्विता अयं तु भार्गवो नूनं मरुजः कुपितोयवः १ तेनच रुरुषिव स्ताताय्यक्कं कोपान्महात्मना स्मरतानिहता नूंवंधूनारक्तानिनसंशयः २ गर्भा-
न पिपत्तानूनं मरुणां ग्रतपुत्रकाः तदापम रुणागर्भमि पावर्ष शतं धृतः ३ षडंग श्वाखिलो वेदस्मं गर्भ स्थमेवह विवेशभृगुवंशस्प भूयः प्रियचि
कीर्षया ४ सोयं पितृवधाद्व्यक्तंक्रोधाद्धोहंतुमिच्छति तेजसातस्यदिव्येन चक्षुषि मुषितानिवः ५ तमिमं तातयाचध्वमौर्वमं अयं वः प्रणिपातेनतु
ष्टोदृष्टीःप्रमोक्ष्यति ६ वसिष्ठउवाच राघवमुक्तास्ततः सर्वेराजानस्ते तमरुजं ऊचुःप्रसीदेतितदाप्रसादंचचकारसः ७ अनेनैव च विख्या
तोनाम्नालोकेषुसत्तमः सऔर्वइतिविप्रर्षिरुरुंभित्वाव्यजायत ८ चक्षुषिप्रतिलब्ध्वा च प्रतिजग्मुस्ततो नृपाः भार्गवस्तु मुनिर्मेने सर्वलोकप
राभवं ९ सचक्रे तात लोकानांनाशाय प्रमहामनाः सर्वेषामेव कार्त्स्न्येन मनः प्रवणमात्मनः १० इच्छन्नपचितिं कर्तुं भृगूणां भृगुनंदनः सर्व
विना १ लोकविनाशाय तपसा महता न्वितः ११

ति ८ आत्मनोमनः सर्वेषां अपचितिं कर्तुं प्रवणं उन्मुखं इच्छतस्वमनोपचितिं कर्तुंयोजयतीत्यर्थः १० ११ ॥

१२ १५ विकृष्टेन अतिहरणेन बहुनात्क्षत्रियैः निभिन्नमात्रैः १६ १९ आत्मेहति एतेन भृगुतनारिनामरणांग्राह्मणानरविषयं दर्शितं २० १ मावधीरितिक्षत्रियानत

तापयामासतांल्लोकान्सदेवासुरमानुषान् तपसोग्रेणमहतावंशपितामहान् ततस्तेपितरस्तातविज्ञाय भृगुनंदनं पितृलोकादुपागम्यसर्वऊचुरिदंव
चः १३ पितरऊचुः और्वदृष्टः प्रभावस्तेतपसोग्रस्यपुत्रक प्रसादंकुरुलोकानांनियच्छक्रोधमात्मनः १४ नानीशैर्हितदातातभृगुभिर्भावितात्मभिः व
धोस्त्युपेक्षितः सर्वैः क्षत्रियाणांविहिंसतां १५ आयुषाविप्रकृष्टेनयदानः खेदआविशत् तदास्माभिर्वधस्तातक्षत्रियैरीप्सितः स्वयं १६ निखातंयच्चवैवि
त्तंकेनचिद्भृगुवेश्मनि वैरायैवतदान्यस्तंक्षत्रियान्कोपयिष्णुभिः १७ किंहिवित्तेननःकार्यंस्वर्गेप्सूनांद्विजोत्तम यदस्माकंधनाध्यक्षः प्रभूतंधनमाहरत्
१८ यदातुमृत्युरादातुंननःशक्नोतिसर्वशः तदास्माभिरयंदृष्टउपायस्तातसंमतः १९ आत्महापुमांस्तातनलोकाँल्लभतेशुभान् ततोस्माभिः समीक्ष्यै
वंनात्मनात्मानिपातितः २० नचैतन्नःप्रियंतातयदिदंकर्तुमिच्छसि नियच्छेदंमनःपापात्सर्वलोकपराभवात् २१ मावधीःक्षत्रियांस्तातनलोकान्स
प्तपुत्रक दूषयंतंतपस्तेजःक्रोधमुत्पतितंजहि २२ इत्यादिपर्वणिऔर्वे ॥ ॥

इतिपंतत्वेनानपराधिनः सप्तलोकान्भरताः स्म मावधीः किंतुनः सभ्रंतंतेजोदूषयंतंक्रोधंजहिपाणींतत्रसमुपेक्ष्य २१ अध्यायः ॥ ११ ११ १२ ११११११

उक्तः १ अनिस्तीर्णः अकृतकार्यः २ वृथोत्पन्नः क्रोधो जेतव्यः न तु सकारणः कस्मादपो हीति ३ क्रोधकारणमाह अशिक्षानामिति स्थाने युक्तं । ४ तद्विपरीतं रुत्रियाप्तु
कुरित्याह अक्रोधमिति ६ क्रांतः उपक्रांतः ६ तर्हि रुत्रिपा एव वध्याः न तु लोकास्तत्र आह संपूर्णेति द्वाभ्यां कोशो जरायु रूपा मांसपेशी संपूर्णाः कोशो मांसांताः परिपक्वाः

और्व उवाच उक्तवानस्मि पत्क्रोधात्प्रतिज्ञां पितरस्तदा सर्वलोकविनाशाय न सा मे वितथा भवेत् १ वृथारोषप्रतिज्ञो वै नाहं भवितुमुत्सहे अनिस्तीर्णो
हि मां रोषो दहेदग्निरिवारणिं २ यो हि कारणतः क्रोधं संजातं क्षंतुमर्हति नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुं ३ अशिक्षानां नियंता हि शिष्टानां
परिरक्षिता स्थाने रोषः प्रयुक्तः स्यान्नृपैः सर्वजिगीषुभिः ४ अश्रौषमहमूरुस्थो गर्भशय्यागतस्तदा आरावं मातृवर्गस्य भृगूणां क्षत्रियैर्वधे ५ सं
हारो हि यदा लोके भृगूणां क्षत्रियाधमैः आगर्भोच्छेदनात्क्रांतस्तदा मामन्युराविशत् ६ संपूर्णकोशाः किल मे मातरः पितरस्तथा भयात्सर्वे
षु लोकेषु नाधिजग्मुः परायणं ७ तान्भृगूणां यदा दारान्कश्चिन्नाभ्युपपद्यत माता तदा दधारेयमूरुणैकेन मां शुभा ८ प्रतिषेद्धा हि पापस्य यदा
लोकेषु विद्यते तदा सर्वेषु लोकेषु पापकृन्नोपपद्यते ९ ॥ ॥

भीरक्षत्वर्थः कोशोर्थस्य च पेमांसपेश्यामिति विश्वः । संपूर्णकोशा इत्यपि पठंति । लोकैः सत्यपि सामर्थ्ये मन्मातॄणां त्राणं न कृतमतस्तेपि वध्या एवेत्यर्थः ७ ८ एतदेवोपपादयति यतिनिषेद्धेति । प्रतिषेद्धरि सति पापकर्ता एव नोपलभ्यते असति तु सर्वोपि पापी एव भवतीति इति श्लोकद्वयार्थः ९ ॥

१० पापंपापकारिणां ११ १३ किल्बिषात्प्रशासनजात १४ १६ व्यापहातुंउछेतुं १७ आपोमपाइतिकारणाभिज्ञास्तसुरश्चासुलोका अपिग्धमा यारत्मर्षः १८

२१

यशानुमतिपेद्धारंपापोनलभतेक्वचित तिष्ठंतिवरवोलोकेतशपापेषुकर्मसु १० जानन्नपिचयःपापंक्रिमान्ननिपछति ईशःसन्सोपितेनैवकर्मणासं
प्रयुज्यते ११ राज्ञभिश्चश्चरैश्चैवपरिवैपितेणमम शंकेनेशकितात्रातुमिहंमन्येहजीवितं १२ अतएषामहंक्रुद्धोलोकानामीश्वरोरघहे भवतांच
वलेनालमहंसमभिवर्त्तितुं १३ ममापिचेन्द्रवैरवमीश्वरस्सतोमहत उपेक्षमाणास्यपुनर्लोकानंकिल्बिषात्स्पं १४ पश्चापंमसुजोमेग्निर्लो
कानाशतुमिछति इहेरषचमामेवनिगृहीतःस्वतेजसा १५ भवतांचविजानामिसर्वलोकहितेरतां तस्माद्दिच्छ्यंपक्षेपोलोकानाममवेश्व
राः १६ यन्मम्सृजतेग्निर्लोकानाशतुमिछति अस्तुतंमुचभद्रंतेलोकास्यसुमतिष्ठिताः १७ आपोमपाःसर्वरसाःसर्वमापोमयंजगत त
स्मारसुविमुंचेमंक्रोधाग्निंद्विजसत्तम १८ अपंतिष्ठतुतेविमपरीछासिमहोरधी मसु[illegible]जोग्निर्दहत्वापोलोकास्यापोमपाःस्मृताः १९ एवंम
तिस्तासेस्पंतवानघभविष्यति नचैवंसोमरणलोकागमिष्यंतिपराभवं २० वसिष्ठउ व ततस्तंक्रोधजंतातऔर्वोग्निंवरुणालये उत्ससर्जस
चैवापउपपुंकेमहोरधौ २१

१९ २० २१ उपपुंकेभरुपति २१ २१ २१ २१ २१ २१ २१ २१ २१ २१ २१ २१ ७

श्रो·

३०५

हयशिरः वडवामुखं २२ २३ अध्यायः एवं १ २ ३ मामीरुमनाशेषेपं ४ ५ मुष्मेणापिणांनिग्रहो विमलेनातेनयज्ञेनयज्ञियेनद्वेषेणाहूयमानेन ६ ७

महद्वधशिरोभत्वायत्तदेहविरोधिवृः तमथ्यमुखिरन्धकातिवत्वायोमहोदधौ २२ तस्मात्वमपिभरंतेनलोकान्हंतुमर्हसि पराशरयांस्त्रोकाञ्ज्ञानतस्ता
नवतंवर २३ इत्यारिपवेशेयौर्वे गंधर्वज च एवमुक्तः सविप्रर्षिर्वसिष्ठेनमहात्मना न्यषछरात्मनः क्रोधसर्वलोकपराभवात् १ ईजेचससमहेते
ज्ञाः सर्ववेदविदांवरः ऋषीणांरुससत्रेणशात्केयोयपराशरः २ ततोवृद्धांस्तवालांस्तु ारुसान्समहामुनिः ददाहवितितेयज्ञेशक्तेर्वध
मनुस्मरन् ३ नहिंतंवारयामासवसिष्ठोरुसांवधां द्वितीयामस्यमांरुम्प्रतिज्ञामितिनिश्चयात् ४ त्रयाणांपावकानांचसत्रेतस्मिन्महामु
निः आसीत्पुरस्ताद्दीप्तानांचतुर्थद्वयपावकः ५ तेनयज्ञेनशुभ्रेणहूयमानेनशक्तितः तद्विदीपितमाकाशंरूपेणौवघनात्यये ६ तेव
सिष्ठादयःसर्वेमुनयस्तत्रमेनिरे तेजसादीप्यमानंवैद्वितीयमिवभास्करं ७ ततःपरमदुःप्रापमभ्येत्यऋषिरुदारधीः समंमापयिषुःसत्रेनमति
:समुपागमत् ८ तदापुलस्त्यःपुलहः क्रतुश्चैवमहाक्रतुः तत्राग्मुरमिवघ्नरुसांजीवितेप्सया ९ पुलस्त्यस्तुवधात्तेषांरक्षसां भरतर्षभ
उवाचेदंवचःपार्थपराशरमरिंदमं १० सा१

उ२

८ ९ १० ॥ राम छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ छ

राम

३०५

अपविघ्नंतेसत्रमितिशेषः अजानतामितिपापमविकृत्वानंदसीतिसाधिक्षेपप्रश्नः ११ मत्यंमम १२ १३ शक्तिंचेतिपुत्रद्रोहेणापितानशप्तनीत्युक्तं १४ शापात्शक्तिनाशमोराज्ञाशक्तिमेवभक्षि

कच्चित्तमासविघ्नंतेकच्चित्त्वंहृषिपुत्रक अजानतामदोषाणांसर्वेषांरक्षसांवधात् ११ प्रजोच्छेदमिमंमह्यंनहिकर्त्तुंत्वमर्हसि
नैषतातद्विजातीनांधर्मोदृष्टस्तपस्विनां १२ शमएवपरोधर्मस्तमाचरपराशर अधर्मिष्ठंवरिष्ठःसन्कुरुषेत्वंपराशर १३ शक्तिंचापि
हिधर्मज्ञंनातिक्रान्तमिहार्हसि प्रजायाश्चममोच्छेदंनचैवंकर्त्तुमर्हसि १४ शापाद्धिशक्तेर्वासिष्ठतदातदुपपादितं आत्मजेनसदो
षेणशक्तिर्नीतइतोदिवं १५ नहितंराक्षसःकश्चिच्छक्तोभक्षयितुंमुने आत्मनैवात्मनस्तेनदृष्टोमृत्युस्तदाभवत् १६ निमित्तमा
२ त्रंतत्रासीद्विश्वामित्रःपराशर राजाकल्माषपादश्चदिवमारुह्यमोदते १७ येचशक्त्यवराःपुत्रावसिष्ठस्यमहामुने तेचसर्वेमुदा
युक्तामोदन्तेसहिताःसुरैः १८ सर्वमेतद्वसिष्ठस्यविदितंवैमहामुने रक्षसांचसमुच्छेदएषताततपस्विनां १९ निमित्तभूतस्त्वं
चात्रक्रतौवासिष्ठनन्दन तत्सत्रंमुंचभद्रंतेसमाप्तमिदमस्तुते २० गन्धर्वउवाच एवमुक्तःपुलस्त्येनवसिष्ठेनचधीमता तदासमा
पयामाससत्रंशाक्तोमहामुनिः २१ सर्वराक्षससत्रायसंभृतंपावकंतदा उत्तरेहिमवत्पार्श्वेउत्ससर्जमहावने २२

तवानऽतःशक्तेरेवायमपराधोनराक्षसानामित्यर्थः १५ १६ मोदतेशक्तिः १७ १८ समुच्छेदएषःत्वंनिमित्तभूतइतियोजना १९ मुंचसत्र २० २१ २२

२३ अध्यायः श्लोकसमाप्तं एता १ अगम्यागमनात्वात् २ ३ ४ ५ ६ ७ ८ ९ अकृतार्थोअकृतपुत्रत्वात् १० ११

सतत्राप्याश्रमांस्तान्वित्रस्तान्सतत एवच भक्षयन्दृश्यतेवन्हिः सदापर्वणिपर्वणि २१ इत्यादिपर्वणिपोर्डसमाप्तं अर्जुनउवाच राज्ञा
कल्माषपादेनगुरौब्रह्मविदांवरे कारणंकिंपुरस्कृत्यभार्यावैसन्नियोजिता १ जानतावैपरंधर्मंवसिष्ठेनमहात्मना अगम्यागमनंकस्मा
त्कृतंतेनमहर्षिणा २ अधर्मिष्ठंवसिष्ठेनकृतंचापिपुरासखे एतन्मेसंशयंसर्वंछेत्तुमर्हसिपृच्छतः ३ गंधर्वउवाच धनंजयनिबोधे
दंयन्मांत्वंपरिपृच्छसि वसिष्ठंप्रतिदुर्धर्षंतथामित्रसहंनृपं ४ कथितंतेमयासर्वंयथाशप्तःसपार्थिवः शक्तिनाभारतश्रेष्ठवासिष्ठेन
महात्मना ५ सतुशापवशंप्राप्तःक्रोधपर्याकुलेक्षणः निर्जगामपुराद्राजासहदारःपरंतपः ६ अरण्यंनिर्जनंगत्वासदारःपरिचक्रमे
नानामृगगणाकीर्णंनानासत्वसमाकुलं ७ नानागुल्मलताछन्नंनानाद्रुमसमावृतं अरण्यंघोरसंनादंशापग्रस्तःपरिभ्रमन् ८
सकदाचित्क्षुधाविष्टोमृगयन्भक्ष्यमात्मनः ददर्शसुपरिक्लिष्टःकस्मिंश्चिन्निर्झरेवने ९ ब्राह्मणींब्राह्मणंचैवमिथुनायोपसंगतौ
तौतंवीक्ष्यसुवित्रस्तावकृतार्थौप्रधावितौ १० तयोःप्रद्रवतोर्विप्रंजग्राहनृपतिर्बलात् दृष्ट्वागृहीतंभर्तारमथब्राह्मण्यभाषत ११

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ ॥

ले १

शृणुराजन्ममवचोपत्नींत्वंस्वामिसत्तम आदित्यवंशप्रभवस्त्वंहिलोकेपरिश्रुतः १२ अप्रमत्तस्थितोधर्मेगुरुशुश्रूषणेरतः
शापोपहतदुर्बुद्धेनपापंकर्तुमर्हसि १३ ऋतुकालेतुसंप्राप्तेभर्तृव्यसनकर्षिता अकृतार्थाह्यहंभर्त्राप्रसवार्थंसमागता १४
प्रसीदनृपतिश्रेष्ठभर्तारंमेविसर्जतां एवंविक्रोशमानायास्तस्यास्तुसनृशंसवत् भर्तारंभक्षयामासव्याघ्रोमृगमिवेप्सितं तस्याः
क्रोधाभिभूतायायास्त्वश्रूण्यपतन्भुवि सोग्निःसमभवद्दीप्तस्तंचदेशंव्यदीपयत् १६ ततःसाशोकसंतप्ताभर्तृव्यसनकर्षिता
कल्माषपादंराजर्षिमशपद्ब्राह्मणीरुषा १७ यस्मान्ममाकृतार्थायास्त्वयाक्षुद्रनृशंसवत् प्रेक्षंत्याभक्षितोमेद्यप्रियोभर्त्ताम
हायशाः १८ तस्मात्त्वमपिदुर्बुद्धेमच्छापपरिविक्षितः पत्नीमृतावनुप्राप्यसद्यस्त्यक्ष्यसिजीवितं १९ यस्यचर्षेर्वसिष्ठस्यत्वयापु
त्राविनाशिताः तेनसंगम्यतेभार्यातनयंजनयिष्यति २० एषतेवंशकरःपुत्रोभविष्यतिनृपाधम एवंशप्त्वातुराजानंसात
थांगिरसीशुभा तस्यैवसंनिधौदीप्तंप्रविवेशहुताशनं २१ वसिष्ठश्चमहाभागःसर्वमेतदवैक्षत ज्ञानयोगेनमहता
तपसाचपरंतप २२

आ० प
३०८

मदयंत्यामहिष्या २३ २६ अध्यायःवासिष्ठंसमाप्तं अस्माकं १ २ ३ ४ ५ ६ प्रतिजग्राहस्वीचकार ७ पांचालींचलब्धामाशंसिरे ८

मुक्तशापस्तुराजर्षिःकालेनमहताततः ऋतुकालेविप्रतितोमदयंत्यानिवारितः २३ नहिसस्मारसनृपस्तंशापंकाममोहितः
देव्याःसोथवचःश्रुत्वासंभ्रांतोनृपसत्तमः २४ तंशापमनुसंस्मृत्यपर्यतप्यद्भृशंतदा २५ एतस्मात्कारणाद्राजावसिष्ठंसंन्ययोजयत्
स्वदारेषुनरश्रेष्ठशापदोषसमन्वितः २६ ॥ इत्यादिपर्वणिवासिष्ठंसमाप्तं अर्जुनउवाच अस्माकमनुरूपोवैयस्माद्गंधर्ववेद
वित पुरोहितस्तमाचक्ष्वसर्वंहिविदितंतव १ गंधर्वउवाच यवीयान्देवलस्यैषवनेभ्राताततपस्यति धौम्यउत्कोचकेतीर्थेतंवृ
णुध्वंयदीच्छथ २ वैशंपायनउवाच ततोर्जुनोस्त्रमाग्नेयंप्रददौतद्यथाविधि गंधर्वायतदाप्रीतोवचनंचेदमब्रवीत ३ त्वय्येव
तावत्तिष्ठंतुहयागंधर्वसत्तम कार्यकालेग्रहीष्यामःस्वस्तितेस्त्वितिचाब्रवीत ४ तेन्योन्यमभिसंपूज्यगंधर्वःपांडवाश्चह रम्या
द्भागीरथ्यास्तीराद्यथाकामंप्रतस्थिरे ५ ततउत्कोचकंतीर्थंगत्वाधौम्याश्रमंतुते तंवव्रुःपांडवाधौम्यंपौरोहित्यायभारत ६ तान
धौम्यःप्रतिजग्राहसर्ववेदविदांवरः वन्येनफलमूलेनपौरोहित्येनचैवह ७ तेसमाशंसिरेलब्धांश्रियंराज्यंचपांडवाः ब्राह्मणं
तंपुरस्कृत्यपांचालींचस्वयंवरे ८

एम
३०८

९ १० ११ १२ द्रौपदीस्वयंवरेध्याय: ततस्ते १ २ ३ ४ ५ ६ ७ ८

पुरोहितेनतेनार्थ्यगुरूणांसंगतास्तह नाथवंतमिवात्मानंमेनिरेभरतर्षभाः ९ सहिवेदार्थतत्त्वज्ञस्तेषांगुरुरुदारधीः
तेनधर्मविदापार्थायाज्यासर्वविदाकृताः १० वीरांस्तुसहितान्मेनेप्राप्तराज्यान्स्वधर्मतः बुद्धिवीर्यबलोत्साहैर्युक्तान्देवानिव
द्विजः ११ कृतस्वस्त्ययनास्तेनततस्तेमनुजाधिपाः मेनिरेसहितागंतुंपांचाल्यास्तंस्वयंवरं १२ इत्यादिपर्वणिद्रौपदीस्व
यंवरे वैशंपायनउवाच ततस्तेनरशार्दूलाभ्रातरःपंचपांडवाः प्रययुर्द्रौपदींद्रष्टुंतंचदेशंमहोत्सवं १ तेप्रयातानरव्याघ्राः
सहमात्रापरंतपाः ब्राह्मणान्ददृशुर्मार्गेगच्छतःसंगतः २ तऊचुर्ब्राह्मणाराजन्पांडवान्ब्रह्मचारिणः क्वभवंतोगमिष्यंति
कुतोवाभ्यागताइह ३ युधिष्ठिरउवाच आगतानेकचक्रायाःसोदर्यानेकचारिणः भवंतोवैविजानंतुसहमात्राद्विजर्षभाः
४ ब्राह्मणाऊचुः गच्छताद्यैवपांचालान्द्रुपदस्यनिवेशने स्वयंवरोमहांस्तत्रभवितासुमहाधनः ५ एकसार्थप्रयाता
स्मवयंतत्रैवगामिनः तत्रह्यद्भुतसंकाशोभवितासुमहोत्सवः ६ यज्ञसेनस्यदुहितादुपदस्यमहात्मनः वेदीमध्यात्स
मुत्पन्नापद्मपत्रनिभेक्षणा ७ दर्शनीयानवद्यांगीसुकुमारीमनस्विनी धृष्टद्युम्नस्यभगिनीद्रोणशत्रोःप्रतापिनः ८

स्वा० प० ३०८

९ १३ दायान्देयानिधनानिवाहूधनमित्यादि १४ १५ नटाःवेषभेदकारिणःवैतालिकाःमंगलपाठकारिणःनर्तकाःप्रसिद्धाःसूताःपौराणिकाःमागधाःवंशसूचकाःनियोधकाःमल्लाः

योज्ञानःकवचीखड्गीसशस्त्रशरासनः सुसन्निद्धोमहाबाहुःपावकेपावकोपमः ९ समानस्थानवर्णागाद्रौपदीतनुमध्यमा
नीलोत्पलसमोगंधोयस्याःक्रोशात्प्रवर्तति १० यज्ञसेनस्यदुहितांत्स्वयंवाकृतसत्रां गच्छामहेवयंद्रष्टुंतंचदिव्यंमहोत्सवं ११
राजानोराजपुत्राश्चयज्वानोभूरिदक्षिणाः स्वाध्यायवंतःशुचयोमहात्मानोयतव्रताः १२ तरुणादर्शनीयाश्चनानादेशसमा
गताः महारथाःकृतास्त्राश्चसमुपैष्यंतिभूमिपाः १३ तेतत्रविविधान्दायान्विजयार्थंनोमुनाः प्रदास्यंतिधनंगाश्चभक्ष्यंभो
ज्यंचसर्वशः १४ प्रतिगृह्यचतत्सर्वंदृष्ट्वाचैवस्वयंवरं अनुभूयोत्सवंचैवगमिष्यामोयथेप्सितं १५ नटावैतालिकास्तत्रनर्त
काःसूतमागधाः नियोधकाश्चदेशेभ्यःसमेष्यंतिमहाबलाः एवंकौतूहलंकृत्वादृष्ट्वाचप्रतिगृह्यच सहास्माभिर्महात्मानः
पुनःप्रतिनिवर्त्स्यथ १७ दर्शनीयांश्चवःसर्वान्सुरूपानवस्थितान समीक्ष्यकृष्णावरयेत्संगत्यैकतमंवरं १८ अयंभ्रा
तातवश्रीमान्दर्शनीयोमहाभुजः नियुज्यमानोविजयेत्संगत्साद्रविणांबहु १९ युधिष्ठिरउवाच परमंभोगमिष्यामो
द्रष्टुंचैवमहोत्सवं भवद्भिःसहिताःसर्वेकन्यायास्तंस्वयंवरं २० ॥ इत्यादिपर्वणिद्रौपदीस्वयंवरे ॥ ॥ ॥

१६ १७ संगत्यदैवयोगेन १८ १९ परमंयथेष्टं २० अध्यायः ॥

स्व० ३०८